भारती-संस्कृत-विद्या-निकेतनस्य ग्रन्थमालायाः
द्वितीयं पुष्पम्

अद्वैत-विजय-वैजयन्ती

ADVAITA-VIJAYA-VAIJAYANTI

ग्रन्थकर्ता
Author
द्वादशदर्शनकाननकेसरी आचार्यः स्वामी काशिकानन्दगिरिजी
महाराजः, महामण्डलेश्वरः
Dvadashadarshanakananakesari Acharya Swami
Kashikanandagiriji Maharaj, Mahamandleswar.

भारती-संस्कृत-विद्या-निकेतनम्
Bharati-Samskrta-Vidya-Niketanam
१२,शङ्कर-कुञ्जः, गोविन्द-नगरम्, घाटकोपर, मुम्बापुरी-४०००८४
12, Shankar Kunj, Govind Nagar, Ghatkopar,
Bombay-400084.

अद्वैत-विजय-वैजयन्ती

ADVAITA-VIJAYA-VAIJAYANTI

ग्रन्थकर्ता

Author

द्वादशदर्शनकाननकेसरी आचार्यः स्वामी काशिकानन्दगिरिजी

महाराजः, महामण्डलेश्वरः

Dvadashadarshanakananakesari Acharya Swami

Kashikanandagiriji Maharaj, Mahamandleswar.

भारती-संस्कृत-विद्या-निकेतनम्

Bharati-Samskrta-Vidya-Niketanam

१२,शङ्कर-कुञ्जः, गोविन्द-नगरम्, घाटकोपर, मुम्बापुरी-४०००८४

12, Shankar Kunj, Govind Nagar, Ghatkopar,

Bombay-400084.

प्रकाशकः :-

भारती-संस्कृत-विद्या-निकेतनम् - ऑगस्ट १९९१.

Publisher:-

Bharati-Samskrta-Vidya-Niketanam - August 1991.

प्रासिस्थानम् :-

१) भारती-संस्कृत-विद्या-निकेतनम्

१२, शङ्कर-कुञ्जः, गोविन्द-नगरम्, घाटकोपर, मुम्बापुरी-४०००८४

२) आनन्दवन-आश्रम, ४१६-अ, स्वामी विवेकानन्द मार्गः,

कान्दिवली, मुम्बापुरी-४०००६७.

३) पुस्तक भारती

भारतीय विद्या भवन बिल्डिंग, क. मु. मार्ग, बम्बई ४००००७.

Available at:-

(1) Bharati-Samskrta-Vidya-Niketanam

12, Shankar Kunj, Govind Nagar, Ghatkopar,

Bombay-400084.

(2) Ananda-van Ashram

416-A, S. V. Road, Kandivli, Bombay-400067.

(3) Pustak Bharati

Bharatiya Vidya Bhavan Building, K.M.Marg,

Bombay-400007.

ॐ

आमुखम्

'अद्वैतविजयवैजयन्ती' इत्याख्यायाः पुस्तिकायाः सुलेखका महामण्डलेश्वर-श्रीकाशिकानन्द- महाभागाः संस्कृतपारावारे नरीष्णानां सुपरिचिता एव । एतैरद्वैतमताभिमानिभिरनेके ग्रन्थाः विरचिताः स्वीयं वैदुष्यं सुष्ठु प्रकटीकृतं तिष्ठति । बैंगलूरपुर्यां जयनगराख्ये भागे कार्यं कुर्वत्या वेदवेदाङ्गवेदान्तपाठशालासमित्या गते चैत्रमासे स्वकीयायाः पाठशालायाः उद्घाटनसमये काऽप्यपूर्वा विचारगोष्ठी समायोजितासीत्। अत्र 'क्षेत्रज्ञं चापि मां विद्धि सर्वक्षेत्रेषु भारत' इतीमं विषयमधिकृत्य द्वैताद्वैतविशिष्टाद्वैत-सम्बन्धिप्रतिष्ठितपीठाधिपतीनामुपस्थितौ विद्वदग्रेसरैर्दिनत्रयं विचारमन्थनं कृतम् । अस्मिन् समये सुगृहीतनामधेयैः श्रीकाशिकानन्दगिरिमहाभागैः स्वीयमध्यक्षीयं यद् भाषणं प्रदत्तं तस्यैवानुवादोऽत्र प्राकाश्यं नीतः । अस्मिन्नवसरे न केवलं द्वैताभिमानिनः पलिमार् मठाध्यक्षाः श्रीमद्विद्यामान्यतीर्थजीमहाराजाः विशिष्टाद्वैताभिमानिनः श्रीरङ्गप्रियमहादेशिकचरणाः पेजावरमठाध्यक्षाः श्रीमद्विश्वेश्वरतीर्थजी महाराजा अपित्वन्ये विद्वांसः

समुपस्थिता आसन् । सर्वैरेतैः पण्डितप्रवरैः उक्ताः विषयेऽत्र संक्षेपेण क्वचित्क्वचिन्निर्दिष्टा सन्ति । मन्थनादेव रत्नानि समुत्पद्यन्त इतीदमैतिह्यमनुसृत्य 'अद्वैतविजयवैजयन्ती' समुद्भूता ।

पाण्डित्यपरम्परामनुसृत्य पूर्वपक्षोत्तरपक्षपद्धतिरत्राचार्यवर्यैः सुष्ठ्ववलम्बिता । अत एव 'क्षेत्रज्ञं चापि मां विद्धि' इत्यस्मिन् वाक्ये जीवात्मपरमात्मनोरैक्यविषये द्वैतवादिनां सन्देहं' तद्बोधकपदाभावात् इत्यत्र प्रदर्श्य प्रारम्भः कृतः । पदानामन्वयविषयेऽपि विधानस्यासङ्गतिमाश्रित्य द्वैतिभिर्यदुक्तं तदपि विशदीकृतमाचार्यवर्यैः । तदनन्तरं क्षेत्रज्ञशब्दस्य जीवार्थकत्वे सम्भवत्यपि परमात्मार्थकत्वं कथं न गण्यते निवारयितुमिति युक्तिभिरन्यैः प्रमाणैश्चोपपाद्य सिद्धान्तपक्षस्य प्राबल्यमाविष्कृतम् । किन्तु 'क्षेत्रज्ञं चापि मां विद्धि' इत्यैक्यप्रतिपादनानन्तरं 'द्वाविमौ पुरूषौ लोके क्षरश्चाक्षर एव च' - उत्तमपुरूषस्त्वन्यः इति पुनर्भेदवर्णनस्य वान्ताशितामात्रत्वं पुरस्कृत्योत्थिता पूर्वपक्षविचारसरणिः । अत्र प्रत्युत्तरं ददद्भिः श्रीकाशिकानन्दमहाभागैः इदं शरीरमित्येवमिदन्तयाप्रत्यक्षनिर्देशस्य विवेचनावसरे 'शर् च ईर् च शरीरम्' इति सुनिपुणमुद्भाव्य वाच्यभेदरूपस्य दोषस्य खण्डनं कृतं तत्सर्वं पठनीयमेव सञ्जातम् ।

जीवेश्वरयोरेकत्वे पूज्यत्व-पूजकत्व, भक्तभजनीयत्वादि

भावविरहैः समापतिते कर्मोपासनादिराहित्यान्मोक्षस्य दुर्घटत्वप्रसङ्ग इत्येष आक्षेपस्तु सुपरिचित एव । किन्तु व्यावहारिकसत्ताभेदम् आश्रित्याद्वैतिभिरस्याक्षेपस्योत्तरं दीयत इति प्रदर्श्य भेदे सति वास्तविकी भक्तिः कथं न संभवतीति भगवत्यात्मार्थं प्रीयमाणे भगवति प्रेम्णो गौणत्वं दृष्टान्तबलेनोपपादयद्भिराचार्यवर्यैः स्वीयं पाटवमाविष्कृतमिति मन्ये। ततः परं द्वैतवादिभिः कृतेन कोलाहलेन प्रवचनावरोधः सञ्जात इत्यत्र न किमपि चित्रम् । अद्वैते समन्वयः सम्भवति द्वैतिनस्तु हीयमानं स्वपक्षं न सहन्त इत्येष अनुभवः पुष्टिं गत इत्येव वक्तव्यम् । अत्र चर्चायां घटपटादि परिनिष्ठिता सरणिस्तु दृश्यत एव , 'तत्वमसि' इत्यत्र सुविदिता भागत्यागलक्षणाचर्चाऽपि नयनपथमवतरति किन्तु चर्चायां बाष्पयाने (ट्रेन) तृतीयश्रेण्याम् (अद्यत्वे द्वितीयश्रेणी) उपवेशन सदृशं सम्प्रति प्रतिदिनमनुभवविषयभूतं दृष्टान्तमादाय समानसत्ताकत्वे एवानुपपन्नत्वम् अर्चकार्चनीयभावस्योद्‌घाटनमाचार्यवर्यैःकृतं तच्चेतसि सुष्ठु पदं करोति। एतदाचार्यवर्याणां विलोभनीयं वैशिष्ट्यमिति मन्ये।

अत एव या सरणिरत्रावलम्बिता सातीव शोभनेति प्रतिभाति । एतदर्थमादरणीयाः श्रीकाशिकानन्दमहाभागा निस्सन्देहमभिवादनम् अर्हन्ति । अस्य प्रकाशनं कुर्वाणया भारती-संस्कृत-विद्या-निकेतनम् इत्याख्यया संस्थया ग्रन्थस्यास्य

प्रकाशने मुद्रणे च युगानुकूलं सङ्गणकसाहाय्यं समर्पितं, जनानां सुलभावबोधार्थं हिन्दीभाषामाश्रित्यानुवादोऽपि पुस्तिकायामस्यां समाविष्ट इति वीक्ष्य मोमुदीति स्वान्तं संस्कृतानुरागिणो जनस्येत्यत्र कः सन्देहः ।

एतद्ग्रन्थनिराकरणाय द्वैतवादिभिरैषमस्त्यने यत् प्रयतितं तदुद्धारोऽप्यन्ते द्वितीयपरिशिष्टरूपेण योजितः । तत्र पूर्वपक्षरूपेण द्वैतवादिभिर्यन्मुद्रितं तदीया पृष्ठसंख्या पङ्क्तिसंख्या चात्र वामभागे निर्दिष्टा विद्यते । पूर्वपक्षस्तु निराकरणाभासमात्ररूप इति नाधिककाठिन्यं मन्ये तदुत्तररूपेऽत्र परिशिष्टग्रन्थ इति शिवम् । अत एव शोभतेतरामियम् "अद्वैतविजयवैजयन्ती" प्रीणनाय च प्रभवतु रसिकानां कृत इति सम्प्रार्थ्य विरम्यते ।

मो. दि. पराडकर
कुलपतिः, मुम्बई-हिन्दी-विद्यापीठम्

३१, जुलै १९९१

Wednesday, December 27, 1989.

Debate on Religious Philosophy

Sri Vidyamanya Theertha Swamiji, of the Sri Jagadguru Sri Madhavacharya Samsthana, Palimar Mutt, Udipi, writes:-

We extend an invitation to a most distinguished scholar of Advaita Vedanta for participation in a 'Vaada Katha' at the Vidwat Sabha to be assembled on the occasion of Madhva Navami celebrations at Udipi between January 27 and February 9.

The sole purpose of this 'Vaada Katha' is to arrive at a correct understanding of truth through friendly discussion, and to proclaim defeat or victory of any party. Therefore this invitation should never be treated as a challenge for any contest. Adi Shankaracharya

has stated: " Truth is determined by frequent dialogues in the form of 'Vaada Katha' between seekers of truth." It is his considered opinion that such 'Vaada Katha' should be held frequently for gaining a correct knowledge of philosophic truth.

As this 'Vaada Katha' is meant to be a friendly discussion for determining truth, the participants should present their views with mutual love and regard. The arguments of each participant will be written on paper and certified by his signature. This is the primary rule of this 'Vaada Katha'. The written records of the discussion should be kept open for translation and publication in several languages so that the society may share the future of this discussion and gain correct understanding of truth.

This 'Vaada Katha' will be held as follows:-

In Advaita Vedanta it is stated that 'Nirguna Brahman' alone is the Reality, that the world is unreal, and that 'Jivatman' is 'Brahman' : We shall start the 'Vaada-Katha' with the proposition that the aforesaid Advaitic statement is not based on valid knowledge but on illusion, and that it is not the true meaning of the Veda-s. Just as the criticism of many doctrines in the "Samaya Paada" of Brahma Sutra is regarded as 'Vaada-Katha', our proposition presented in the form of a criticism would be treated as 'Vaada-katha'. We shall prove our proposition on the basis of Advaidic works, viz. 'Advaita-Siddhi', 'Brahma-nandi' and 'Samkshepa Saririka'.

We invite a most distinguished scholar of Advaita Vedanta to oppose our proposition with counter-arguments. This scholar should carry a testimonial from the Head of any one of the

'Chaturamnaya-Peetha-s' or 'Kamakoti Peetha' of Advaita Vedanta. The testimonial should certify that the scholar concerned is the most distinguished scholar of Advaita Vedanta. The rules of this 'Vaada-Katha' should be decided jointly by both the participants before an assembly of scholars well advance of the 'Vaada-Katha'. At the beginning of the 'Vaada-Katha', we shall present a reward of Rs.50,000 and an embroidered shawl to the Advaitic scholar. We shall feclicitate him with an additional reward of Rs.50,000 after his full participation in the 'Vaada-Katha' in accordance with the rules till its closure. Before the 'Vaada-Katha' is started, this additional sum of Rs.50,000 will be deposited in the custody of an impartial third person.

A most distinguished Advaic Scholar intenting to participate in this 'Vaada-Katha'

should send a letter by Registered Post to us along with the testimonial specified above. The letter along with the testimonial should reach us on or before January 15, 1990. If more than one scholar send letters, only one among them will be selected by casting lots, and he will be duly informed about the same.

बुधवार, दिसम्बर २७, १९८९

धर्मतत्त्वज्ञान पर परिसंवाद

श्री जगद्गुरु श्रीमाध्वाचार्यसंस्थान, पालीमार मठ, उडीपी के श्रीविद्यामान्यतीर्थ स्वामिजी लिखते है :
जनवरी २७ से फरवरी ९ तक उडीपी में होनेवाले 'माध्व नवमी' के उत्सव में होनेवाली विद्वत्सभा में एक 'वाद कथा' का आयोजन किया गया है । इसी अवसर पर सहभागी होने के लिये देश के सब से सुप्रसिद्ध, प्रतिष्ठित अद्वैत -वेदान्त के आचार्य -पण्डित को, हम सहर्ष आमन्त्रित करते हैं ।

इस 'वाद-कथा' का एकमात्र उद्देश्य यह है कि हम सहयोग और मैत्रीपूर्ण शास्त्रार्थ से 'सत्य' को ठीक समझे, न कि किसी एक को

विजयी और दूसरे को पराजित सिद्ध करें । इसी लिये यह आमंत्रण को किसी भी प्रकार की चुनौती या आह्वान न समझें । आदि शङ्कराचार्य ने कहा था "सत्य का निश्चय सत्यान्वेषीयों के समय समय पर आपस में होने वाले 'वाद-कथा' के रूप में संवाद से ही होती है। " उनका यह निश्चित मत था कि ऐसी 'वाद-कथा' तत्त्वज्ञान के सिद्धान्तों को ठीक जानने के लिये बारबार होती रहें ।

इस 'वाद-कथा' का आयोजन मैत्रीपूर्ण भाव से सत्य के निश्चय के लिये होने के कारण, भाग लेने वाले महोदय अपने मन्तव्य को आपस में प्रेमभावना और आदर से प्रस्तुत करेंगे । हर-एक सहभागी का मन्तव्य लिखित रहेगा और उसके ऊपर उनके हस्ताक्षर रहेंगे । यह एक 'वाद-कथा' का प्राथमिक नियम होगा । हर व्यक्ति की सह लिखित नोंध आपस में चर्चा- विचारणा के लिये और अन्य विविध भाषाओं में अनुवाद और प्रसिद्धि के लिये खुली(मुक्त) रखी जायगी । ताकि संस्था भी ज्ञानशोधन के लिये भविष्य में इसका प्रयोग कर सकें ।

यह 'वाद-कथा' इस प्रकार रहेगी :-

अद्वैत-वेदान्त में कहा है कि "निर्गुण ब्रह्म ही एक मात्र सत्य है, यह जगत झूठा है, और जीवात्मा स्वयं ही ब्रह्म है ।"

" ब्रह्म सत्यं जगन्मिथ्या जीवो ब्रह्मैव नाऽपरः । "

इसी सूत्र को पूर्वपक्ष में लेकर हम आरंभ करेंगे कि यह अद्वैत सिद्धान्त ज्ञान पर आधारित न हो कर भ्रम पर आधारित है । और जैसे माना जा रहा है, वह वेदों का सही अर्थ नहीं है ।

जिस प्रकार 'ब्रह्मसूत्र' के 'समयपाद' में बहुत सारे सिद्धान्तों की टीकाओं को 'वाद-कथा' माना गया है, हमारी यह शास्त्रार्थटीका को भी वैसे ही 'वाद-कथा' के रूप में माना जायगा। हम अपना पूर्वपक्ष सिद्ध करने के लिये निम्न लिखित अद्वैतग्रन्थों को ही आधार रखेंगे :

अद्वैतसिद्धि, ब्रह्मानन्दी और संक्षेप शारीरक ।

हमारे पक्ष का खण्डन करने के लिये प्रतिपक्ष में हम एक बहुजन प्रसिद्ध, प्रतिष्ठित, विद्वान आचार्य को आमन्त्रित करते हैं । विद्वान महोदय को किसी भी एक अद्वैतवेदान्त की चतुराम्नाय पीठ या कामकोटी पीठ के पीठाधिपति से प्रमाणपत्र लाना होगा, जिस में प्रमाणित किया गया हो कि आप अद्वैत-वेदान्त के विशेषरूप से प्रसिद्ध विद्वान हैं।'वाद-कथा' के लिये अन्य नियम'वाद-कथा' के पर्याप्त समय पहले ही, अन्य विद्वानों की उपस्थिति में दोनों पक्ष के भाग लेनेवाले विद्वान आपस में सहमति से निश्चित करेंगे।'

वाद-कथा' के प्रारंम्भ में ही हम यह अद्वैती विद्वान पण्डित को सन्मान के रूप में रु. ५०,०००/- और एक बुनी हुई शाल भेंट करेंगे । इस के अतिरिक्त हम उस अद्वैत विद्वान का, जिसने इस 'वाद-कथा' में नियमानुसार सम्पन्न होने तक पूर्णस्वरूप से भाग लिया, एक और सन्मान रु. ५०,०००/- की धनराशि के साथ करेंगे। इस 'वाद-कथा ' के प्रारम्भ में ही हम इस रु. ५०,०००/- की धनराशि को किसी एक तीसरी निःस्पृह व्यक्ति के पास जमा करेंगे।

जिस किसी सुप्रतिष्ठित अद्वैत पण्डित को इस 'वाद-कथा' में भाग लेना हो उनसे नम्र विनंति है कि अपना आवेदनपत्र उक्त लिखित प्रमाणपत्र के साथ हमें दिनाङ्क १५ जनवरी १९९० या उसके पूर्व पहूंचें इस प्रकार भेज दें। यदि हमारे पास एक से अधिक विद्वानों के आवेदनपत्र आयेंगे तो हम 'गुंटिकापात / भाग्यचयन पद्धति से उनमें से निश्चित करेंगे और उनको उचित समय में जानकारी दे देंगे।

श्रीलाः विद्यामान्यतीर्थस्वामिमहोदयाः ! हार्दिकानि नारायणस्मरणानि भवदीयमुद्घोषणापत्रंप्रथमप्रकाशितमृषिकेशगतेन कस्यचिद्हस्ते व्यलोकि मया । तदुत्तरणाय बहवः पण्डिता उदयच्छन्, पत्राणि च प्रैषयन्निति च श्रुतम् । तेषां पत्राणामुत्तरमप्रदाय प्रकारन्तरेणोद्घोषणान्तरं सम्प्रति प्रकाशितं हैदरबादगतेन मया हिन्दुनामधेयोयामाङ्गलभाषापत्रिकायामवालोकि। अत्र च विशेष एष

आसीद् यत् पञ्चसु पीठेष्वन्यतमेन प्रमाणीकृता एव शास्त्रचर्चां कर्त्तुमर्हन्ति, तत्रापि प्रमाणीकृतेष्वेकतम एव शास्त्रचर्चायां नियोक्ष्यत इति । किं च स्वीयपक्षे संख्याविशेषाऽनिर्देशाद् वयम् (we) इति बहुवचनप्रयोगाच्च त्रयो वा समुपस्थितसकलसंग्राहकतया दशपञ्चदशसंख्याका वा भवितुमर्हन्तीति । तत्र सामयिक सम्भावितदोषविशेषव्यत्यस्तमतेरेकस्य पुरुषस्य स्थापनभञ्जनादिकं कथमखिलभारतीयदार्शनिकजनस्वीकरणीयतां प्रतिपद्येतेति भवति चिन्त्यम् । नवदशा वा पञ्चषा वा प्रतिवादिनो हू हूकारं कृत्वाऽपि परमेकलभिभवितुं प्रभविष्यन्तीति कथं तदपि न्याय्यं स्यादित्यपि चिन्त्यम् । अस्तु तद् यथा तथापि । हरिद्वारे भवदीयशास्त्रार्थप्रसङ्गैः प्रकाशितानि कानिचन पत्राणि मया व्यलोकिषत । तत्र चाद्वैतिनामासुरत्वं प्रतितिष्ठापयिषन्तो भवन्तो व्यज्ञायन्त । इह तु सहसैव तत्त्वनिर्णिनीषुत्वं स्वीयं प्रदर्शितमदर्शि । तदिदं वास्तविकं हृदयपरिवर्त्तनं वा स्वाभिप्रायप्रच्छादनमात्रं वेति निश्चेतुमशक्यमिवान्वभूयत । अस्तु तदपि यथा तथा । प्रकृतं किंचिद्विवेचयामः ।

उद्घोषणापत्रे ह्यत्र वर्त्तिष्यमाणा वादकथा तत्त्वनिर्णयमात्रप्रयोजना निर्दिष्टा विद्यते । तत्रेदं ब्रूमः । यद्यपि निश्चितौ हि वादं कुरुत इति वचनम्

आभिमानिकनिश्चयपरतयाऽद्वैतसिद्धिकारैः मधुसूदनसरस्वतीभिः व्याख्यायीति तत्त्वनिर्णयप्रयोजनता संभवति वादादिकथायाः प्रायः सर्वस्याः तथापि किं भवन्तो भवदनुयायिनश्च केवलमाभिमानिकद्वैतनिश्चयवन्तः, किं वा वास्तविकद्वैतनिष्ठा इति भवति प्रश्नः । तत्र प्रथमः पक्ष आचार्यपीठस्थस्य भवतो भवदनुगामिनामन्यभक्तानां च न कथंचित् संभाव्यते । द्वितीयपक्षे तत्त्वनिर्णयफलवाचोयुक्तिरनास्पदैवप्रतिभाति । स्वमत द्वैतनिर्णयस्य जातत्वेन फलत्वाऽयोगात् । अद्वैतमतस्य भवद्भिः स्वीकर्तुमशक्यत्वाच्च । किं नु खल्वद्वैतीनो विजयं प्राप्नुयुस्तदा भवान् स्वीयं द्वैतवादं परित्यज्याऽद्वैतमतं स्वीकर्तुमस्ति सन्नद्धः ? यथा किल वसुबन्धुः परित्यज्य वैभाषिकमतं योगाचारमतमाललम्बे । यथा वा मण्डनमिश्रो विहाय मैमांसकं द्वैतपक्षमद्वैतमतमातस्थे ।

अथ मतं वादिनोरुभयोरपि स्व-स्वमतनिष्ठत्वेऽपि मध्यस्थानां श्रोतॄणामन्येषां च परम्परया पारमार्थिकतत्त्वनिर्णयार्थप्रयोजनतया शास्त्रचर्चेयमायोज्यत इति । तदप्यकिञ्चिदेव । न हि स्वसिद्धान्तविरुद्धबुद्धिं जनानां कश्चित् सोढुमर्हति भवादृशः पीठाचार्यः । अपि चाद्वैतिनामद्वैतनिष्ठत्वाद् द्वैतिनां च द्वैतनिष्ठत्वाद् जनतायास्तत्त्वनिर्णयो वादिनोर्जयपराजयाधीन एव भवितुमर्हतीति स्वीयनिष्ठाविषयतत्त्वविषयकतादृश निर्णयौपयिकजयपरपरां

जयेच्छाया अवश्यम्भावितया ईदृशचर्चाया जल्पत्वं बृहस्पतिनापि वारयितुमशक्यम् ।

तथा हि वादो नाम विप्रतिपत्तिविशिष्टवचनसन्दर्भः । वैशिष्ट्यमत्र स्वघटकैककोटि विशिष्टकोट्यन्तरघटितत्वमेव । वैशिष्ट्यं च स्वविरोधित्वस्ववृतित्वस्वविशिष्टवचनविषयत्वैतत्त्रितयसम्बन्धेन । स्ववृत्तित्वं स्वविरोधित्वसम्बन्धेन । स्ववैशिष्ट्यं वचने स्वविशिष्टप्रमाणोपन्यासपूर्वकत्वस्ववृत्तित्वोभयसम्बन्धेन । अत्र वैशिष्ट्यं स्वोपस्थापकवीतरागकर्त्तृकत्व स्वविषयकनिश्चयजनकत्व-स्वविपरीतकोटिविघटकत्वैतत्त्रितयसम्बन्धेन । कोटिविघटकत्वं च तत्कोटिविषयकज्ञानधर्मिकाऽप्रमाण्यबोधजनकत्वम् । स्ववृत्तित्वं वचने स्वविशिष्टप्रमाणतर्कोपन्यासपूर्वकत्वसम्बन्धेन । स्ववैशिष्ट्यं च स्वानुकूलकृतिमद्वीतरागपुरुषकर्तृकत्वस्वविषयकनिश्चयजनकत्व स्वविषयकोटिविपरीतकोटि विघटकत्वैतत्त्रितयसम्बन्धेन । विघटकत्वं पूर्ववत् । वीतरागत्वं नाम तत्त्वनिर्णयातिरिक्तार्थविषयक - रागशून्यत्वमेव । तादृशपुरुषदौर्लभ्ये वा तथाविधरागाऽप्रयोज्यत्वं वचने निवेश्यम् । स्वोपस्थापकवीतरगपुरुष कर्तृकत्वस्थाने स्वोपस्थापनविशिष्टत्वं निवेशनीयमिति यावत् । तत्र वैशिष्ट्यं स्वानुकूलकृतिसमानाधिकरणकृतिजन्यत्वस्वप्रयोजनतत्वनिर्णय विशिष्टत्वोभयसम्बन्धेन । तत्त्वनिर्णयवैशिष्टयं च स्वविषयकेच्छा-

प्रयुक्तत्वस्वेतरविषयकरागाऽप्रयुक्तत्वोभयसम्बन्धेन । द्वितीये तु वचनस्योपस्थापनरूपत्वात् स्वप्रयोगविशिष्टत्वमात्रं वक्तव्यम् । वैशिष्ट्यं तु तथैवेति । एतत्सर्वं सूचितं भाष्यकारेण पञ्चावयवावश्यकत्वमपि वादेऽननुमन्यमानेन महर्षिणा वात्स्यायनेन । स्पष्टीकृतं च वृत्तिकृता विश्वनाथेन ।

लघुचन्द्रिकाकारश्रीमद्ब्रह्मानन्दसरस्वतीमतेन तु तत्त्वनिर्णय-वैशिष्ट्यं स्वविषयकत्वस्वविषयविषयकसार्वकालिकसंशयाभाव प्रयोजकसंस्कारदार्ढ्यविषयकत्वान्यतरसम्बन्धेन स्वविशिष्टराग-विशिष्टत्वम् । रागवैशिष्ट्यं स्वप्रयुक्तत्व-स्वेतर-रागाऽप्रयुक्तत्वोभयसम्बन्धेन । अनयैव दिशा जल्पलक्षणमपि यथा सूत्रभाष्यवृत्ति परिष्करणीयम् ।

अत्र च वर्त्तिष्यमाणायां कथायां वादलक्षणस्याऽसंभावितत्वाज् जल्पलक्षण पौष्कल्यसत्त्वाच्चाभीक्ष्ण्येन वादकथात्वकथनं मनस्यन्यद्वचस्यन्यदित्याभाणकमेव स्मारयति ।

वर्तमाने समये नानाविधवैज्ञानिकाविष्करणचमत्कार-चाकचिक्यचकितलोचनैर्लोकैर्वैदिकधर्मे निर्मूल्यमाने भौतिकभोगवासनाभग्नभगवद्भावनैर्नास्तिकजनैःविस्तार्यमाणे भोगवादे वैधर्मिकैः यवनादिभिः भारतीयभावुकसंस्कृतावुत्कृत्यमानायां

पारस्परिककलहविशकलितभारतीयैकतायां नानामतविरोधपूर्वकैक-मत्यस्थापनौपयिकयत्नमकुर्वतांवैदिकतरणिशरणानांमनीषिणां तावत् सच्छिद्रायां नावि स्थितानां छिद्रावरोपणप्रयत्नमकुर्वतां परस्परबाहुयुद्धं प्रवर्त्तयतामिव वाग्युद्धमिदं सनातनधर्मावलम्बिनां कृते नूनमगाधदैन्यमहोदधिनिमज्जनमेव सज्जनान् प्रतिभाति । तथापि यदि शास्त्रचर्चाऽऽग्रहो विद्यते तर्हि संनद्धा वयम् । शास्त्रार्थयोग्यतापरिचायनार्थं "द्वादशदर्शनसंग्रहः" (यत्र वेदान्तान्तर्गततया माध्वरामानुजीयादि सिद्धान्ता अपि शतश्लोकीभिर्निबद्धा विद्यन्ते; विंशतिशतकात्मकश्च ग्रन्थः) " न्यायसिद्धान्तरत्नमाला" (यत्र नव्यन्यायपदार्थविवरणं विस्तरेण कृतमस्ति) "वेदान्तसिद्धान्तकुसुमाञ्जलि " रित्यादयो ग्रन्थाः शक्यन्ते निजनिर्मिताः समुपस्थापयितुम्, भवद्भिरपि समानवर्त्मना प्रकारान्तरेण वा स्वीयं योग्यत्वं परिचाययितव्यम् । नात्र पीठविशेषप्रमाणपत्रोपस्थापनच्छलेनाऽपसरणरन्ध्रनिर्माणं वा बहुतर संभाविताऽयोग्यवरणपरिणामविपरीतनिर्णयेन मिथ्याप्रचारणं वा युज्यते । न वयं भवदीयलक्षमुद्रा पुरस्कारलोभिन इति च सम्यगवधेयम् । ततश्चोभयसंमते स्थाने समये चोभयसंमतमाध्यस्थ्येन कर्तव्या शास्त्रचर्चेति विरमामः ।

श्री काशिकानन्दगिरिस्वामिमहामण्डलेश्वराः

श्रीमान् विद्यामान्यतीर्थस्वामी महोदय! हार्दिक नारायणस्मरण!

आपका प्रथम उद्घोषणापत्र मैं ने ऋषीकेश में किसी के हाथ में देखा । अनेक पण्डित उसका उत्तर देने के लिये तैयार हुए और आप को पत्र भी भेजे ऐसा मैं ने सुना । उन पत्रों का उत्तर न देकर प्रकारान्तर से आप ने एक दूसरी उद्घोषणा हिन्दू नाम की इङ्ग्लिश समाचार पत्रिका में प्रकाशित की । इस में विशेषता यह थी कि पाँच पीठों में किसी पीठ के द्वारा प्रमाणित व्यक्ति ही शास्त्रार्थ कर सकता है । उन प्रमाणित व्यक्तियों में भी एक ही की शास्त्रार्थ में नियुक्ति होगी । किन्तु आपने स्वपक्ष में शास्त्रार्थ के लिये कितने व्यक्ति उतारेंगे इसका निर्देश नहीं किया । "हम" ऐसा बहुवचन लिखा भी है । इसका मतलब आपकी ओर से तीन तो शास्त्रार्थ में बैठ सकते हैं, बहुवचन सर्वसंग्राहक हो तो दस-पाँच पचीस भी बैठ सकते हैं । इस विषय में हमारा कहना यह है कि अद्वैतमत का एक ही व्यक्ति बैठेंगा तो सामायिक कोई दोष आ जाये और चित्तविभ्रम हो जाये तो क्या उसका कथन अखिल भारतीय दार्शनिकों को स्वीकार करना पडेगा ? दूसरी बात एक ओर एक व्यक्ति हो और दूसरी ओर दस पंद्रह हों तो दूसरे पक्षवाले हा हा-हू हू कह कर भी प्रथम को हरा देगा । क्या यह उचित होगा ? खैर ।

हरिद्वार में आप के शास्त्रार्थ के प्रसंग में पूर्व प्रकाशित कुछ

पंफलेट मैं ने देखे हैं । उन में आप ने अद्वैतियों को असुर तक कहने में संकोच नहीं किया था । किन्तु संप्रति प्रकाशित पत्र में आप ने तत्वनिर्णयेच्छा दिखाई है । क्या यह आप का वास्तविक हृदय परिवर्तन है या अपने भाव पर पडदा डालने का प्रयास मात्र है ? खैर इस पर भी अधिक चर्चा हम नहीं करते ।

उद्घोषणापत्र में आप ने बताया है कि वाद कथा होगी । तत्वनिर्णयार्थ ही चर्चा होगी । इस पर हमारा यह कहना है कि आप को अभी तक निश्चय नहीं हुआ है क्या ? यदि नहीं तो आप वाद ही कैसे करेंगे ? "निश्चितौ हि वादं कुरुतः" ऐसा बताया है । यद्यपि मैं जानता हूँ ऐसा आभिमानिक निश्चय रखकर भी वाद में उतर सकते हैं किन्तु प्रश्न यह है कि आप और आप के अनुयायी केवल द्वैततत्व में अपना आभिमानिक निश्चय मात्र मानते हैं या वास्तविक निश्चय स्वीकार करते हैं । इन दो विकल्पों में प्रथम विकल्प तो आचार्य पीठस्थ आप में और आप के अनन्यभक्त अनुयायियों में संभावित नहीं है । आप को द्वैततत्वनिर्णय हो चुका है तो द्वैततत्वनिर्णय की इच्छा संभव न होने से वाद का फल वह नहीं हो सकता । अद्वैतमत को तो आप मान नहीं सकते । क्या वाद में अद्वैतमततत्व सिद्ध होकर सामने आ जाये तो आप द्वैतवाद छोडकर अद्वैतमत को स्वीकार करने के लिये तैयार हैं ? जैसे प्राचीनकाल में सुबन्धु वैभाषिकमत

को छोडकर योगाचारमत में आ गये अथवा मण्डन मिश्र मीमांसकों का द्वैतमत छोडकर आचार्य शङ्कर के शिष्य हुए वैसे आप द्वैतमत त्यागकर अद्वैताचार्यों के शिष्य बनेंगे ?

अब शास्त्रार्थ के प्रयोजन के रूपमें एक नवीन विकल्प यह हो सकता है कि वादी और प्रतिवादी अपने - अपने मत में निश्चित एवं निष्ठायुक्त होने पर भी जनता को पारमार्थिक तत्त्वनिर्णय उत्पन्न करने के लिये शास्त्रार्थ की आवश्यकता है । परंतु यह विकल्प भी निःसार है । क्या आप अपने अनुयायियों में अद्वैत निश्चय होता हुआ देखना सह सकेंगे ? आप पीठाचार्य जो ठहरे । दूसरी बात द्वैतवादी तथा अद्वैतवादी दोनों अपने-अपने सिद्धान्त पर अटल हैं । जनता को तत्त्वनिर्णय तभी होगा जब इन दो में एक विजयी हो और दूसरा पराजित हो । पराजित के मत को कोई भी तात्त्विक नहीं मान सकता । फलतः प्रत्येक मतवादी अपनी विजय ही चाहेगा । क्यों कि स्वनिश्चित सिद्धान्त को ही वह दूसरों पर लादना चाहेगा । अन्यथा स्वनिश्चय को ही छोड देता । तब स्वविजयेच्छा और पर-पराजयेच्छा निश्चितरूप से होगी और ऐसी स्थिति में वादकथा न होकर यह जल्पकथा ही होगी । क्यों कि वादकथा में स्वविजयेच्छा नहीं होती है ।

वाद का लक्षण है विप्रतिपत्तिविशिष्टवचनसन्दर्भ । लक्षण संस्कृत

में देखें । उसका सारांश यह है - " शब्दो नित्यो न वा " इस तरह की विप्रतिपत्ति में शब्द नित्य है ऐसा वादी, अनित्य है ऐसा प्रतिवादी सिद्ध करेगा "यह घट है कि मिट्टी है " को लेकर वाद नहीं होता । अतः वाद में आवश्यक है कि

(१) दोनों कोटियाँ परस्पर विरोधी होना चाहिये ।

(२) वादी और प्रतिवादी स्व-स्वपक्षनिश्चायक प्रमाण एवं तर्क सामने रखेंगे ।

(३) दोनों विपरीत कोटि में अप्रामाण्य जताने का प्रयत्न करेंगे ।

(४) वादी तथा प्रतिवादी वीतराग होंगे । अर्थात् तत्त्वनिर्णय की इच्छा से अतिरिक्त इच्छा नहीं रखेंगे - विजयादि की इच्छा नहीं करेंगे । लघुचन्द्रिकाकारके मत से तत्त्वनिर्णयेच्छा या सार्वकालिक संशयाभाव के प्रयोजक दृढतर संस्कार की इच्छा से ही चर्चा होगी इन दो से अतिरिक्त फल के निमित्त नहीं । अत एव वाद में नैयायिकों के पंचावयवादि प्रयोग का नियम नहीं रहता ।

जल्पलक्षण में पञ्चावयव वाक्य का नियम रहता है । विजयेच्छा रहती है । निग्रह स्थानादि का भी प्रयोग होता है । यह सब वात्स्यायनकृत न्यायभाष्य विश्वनाथवृति आदि में स्पष्ट है ।

प्रकृत में आगे होने वाले कथाप्रसंग में वादलक्षण तो रहेगा नहीं । जल्पलक्षण पुष्कल होगा । अतः बारंबार वाद कथा की बात जो

आप करते हैं वह तो 'मनस्यन्यत् वचस्यन्यत्' ही दीख रहा है ।

मेरे मतमें वर्तमान समय ऐसा हैं कि वैज्ञानिकों के आविष्कारों ने लोगों की आँखों को चकाचौन्ध कर दिया है । फलतः वैदिक धर्म को कोई नहीं देखता । भौत्तिक भोगवाद ने तो भगवद्भक्तिभावना को भग्न ही कर दिया है । विधर्मी लोग भारतीय संस्कृति को कुचलने में लगे हैं । इधर पारस्परिक कलह से भारतीय जनता में एकता नष्ट होती जा रही है । ऐसी अवस्था में नानामतविरोध को मिटा कर एकता की स्थापना के लिये प्रयत्न न कर यह वाग्युद्ध करना ठीक उस प्रकार है जैसे नाव में छेद हो गया है, पानी उसी में भर रहा है, लोग समुद्र में चल रहे हैं, नाव के छेदों को बंद करने के बजाय लोग आपस में द्वन्द्वयुद्ध कर रहे हैं । हम वैदिक सनातन धर्म रूपी नाव में बैठे हैं। उस में परस्पर विरोध रूपी छेद हो गया है। दीनता रूपी सागर में आगे बढ रहे हैं । लगता है कि यह दीनता को क्या पार करेगी । बीच में ही डूब जायेगी। अभी भी सम्हलो।

इतने पर भी यदि आप को शास्त्रार्थ करने की इच्छा है तो हम बिल्कुल तैयार हैं। शास्त्रार्थ कीं योग्यता का परिचय देने के लिये हम अपने द्वादशदर्शनसंग्रह न्यायसिद्धान्तरत्नमाला वेदान्तसिद्धान्तकुसुमाञ्जलिआदि अपने ग्रन्थ प्रस्तुत कर सकते हैं। हाँ आपको भी अपनी योग्यता इसी रीति प्रस्तुत करनी होगी। पीठों

पीठों के प्रमाणपत्र का बहाना ढूंढकर भागने की कोशिश मत करो। अयोग्य् वादी का वरणकर अपना विंजयडिंडिम पीटने के अवसर की भी प्रतिक्षा मत करो। लाख रूपये इनाम की बात तो छोडो। स्थल और समय का निश्चय कर लो जो दोनों पक्षों को अनुकूल हो।

अद्वैतविजयवैजयन्ती

(बङ्गलूरनगरीय-विद्वत्परिचर्चा-विषयसङ्ग्रहः, ११-१३/४/१९९०)

"क्षेत्रज्ञं चापि मां विद्धि"

एतद्वाक्ये जीवात्मपरमात्मनोरैक्यं प्रतिपादितमित्यद्वैतिनः। तत्राहुर्द्वैतवादिनः। नात्र जीवात्मपरमात्मनोरैक्यमुच्यते। तद्बोधकपदाभावात्। न च"क्षेत्रज्ञं चापि मां विद्धि"इत्येतदेव वचनं तदैक्यबोधकमिति वाच्यम्। तत्र क्षेत्रज्ञपदस्य जीवात्मार्थकत्वविरहात्।क्षेत्रज्ञपदार्थोऽत्रपरमात्मैव। तं परमात्मानं मां विद्धीति वाक्यार्थः।

"क्षेत्रज्ञं चापि मां विद्धि" इस वाक्य में जीवात्मा एवं परमात्मा की एकता का वर्णन है ऐसा अद्वैतवादी मानते हैं। इस पर द्वैतवादियों का कहना है कि इस वाक्य में जीवात्मा और परमात्मा की एकता का वर्णन नहीं है। क्यों कि ऐसा पद इस में है ही नहीं।

प्रश्न - क्षेत्रज्ञं चापि मां विद्धि(जीवात्मा को परमात्मा समझो) यह शब्द ही दोनों की एकता का कथन करता है।

उत्तर - इस वाक्य में क्षेत्रज्ञ पद का जीवात्मा अर्थ हो तब यह बात है। यहाँ तो क्षेत्रज्ञ शब्द का परमात्मा अर्थ है। श्रीकृष्ण का कहना है कि मुझ श्रीकृष्ण को क्षेत्रज्ञ अर्थात् परमात्मा समझो।

न च "इदं शरीरं कौन्तेय क्षेत्रमित्यभिधीयते । एतद्यो वेत्ति तं प्राहुः क्षेत्रज्ञ इति तद्विदः" इति पूर्वश्लोकेनैव क्षेत्रज्ञपदस्य जीवार्थकत्वं बोध्यत इति वाच्यम् । क्षेत्रपदस्य केवलैतच्छरीरार्थकत्वे तन्मात्रवेदितृतया जीवस्य तथात्वं कथञ्चित् स्यात् । न त्वेवम् । "महाभूतान्यहङ्कारो बुद्धिरव्यक्तमेव च" इत्यादिनाऽग्रे क्षेत्रपदस्य महाभूताहङ्कारबुद्ध्यव्यक्तादि जागतिकसकलपदार्थताया अभिधास्यमानतया सकलतद्विषयकज्ञानस्य जीवेऽसंभवात् । न चैवं क्षेत्रज्ञपदस्य परमात्मार्थकत्वे मामित्यस्यापि परमात्मार्थकत्वात् परमात्मानं परमात्मानं विद्धीत्यर्थः स्यात् ।

प्रश्न - "इदं शरीरं कौन्तेय" इस पूर्वश्लोक में इस शरीर का अनुभव करनेवाला क्षेत्रज्ञ है कहते हुए क्षेत्रज्ञ शब्द का अर्थ जीवात्मा बताया है (इस शरीर का अनुभव जीव ही तो करता है) ।

उत्तर - आप की बात ठीक होती यदि क्षेत्र पद का यही शरीर अर्थ हो । किन्तु स्वयं आगे भगवान ने "महाभूतान्यहङ्कारः ..... एतत्क्षेत्रम्" इत्यादि से पूरे जगत के पदार्थों को क्षेत्र बताया है, उन सब का ज्ञान जीवात्मा को नहीं हो सकता है ।

प्रश्न - यदि क्षेत्रज्ञ शब्द का परमात्मा अर्थ है तो "मां" का भी परमात्मा अर्थ होने से परमात्मा को परमात्मा समझो ऐसा अर्थ होगा

तथा सति घटो घट इतिवच्छाब्दबोध एव न स्यादिति वाच्यम् । क्षेत्रज्ञं परमात्मानं मामेव श्रीकृष्णं विद्धीत्युक्तौ रामं दाशरथिं विद्धि इतिवदुद्देश्यविधेयैक्यविरहात् । ननु क्षेत्रज्ञं मां विद्धीति वा मां क्षेत्रज्ञं विद्धीति वा कीदृशोऽन्वयः? आद्येऽप्रसिद्धमुद्दिश्य प्रसिद्धविधानमसङ्गतं स्यात् । उद्देश्यविधेययोस्तद्वैपरीत्यनियमात्। द्वितीये उद्देश्यस्य प्रथमं प्रयोक्तव्यत्वात् क्रमभङ्गापत्तिरिति चेन्न ।

जैसे कोई कहें घट को घट समझो। ऐसे वाक्य से शाब्दबोध नहीं होता।

उत्तर - जैसे राम को दाशरथि समझो कहने पर बोध होता है वैसे परमात्मा को श्रीकृष्ण समझो कहने पर बोध क्यों नहीं होगा?

प्रश्न - क्षेत्रज्ञ को श्रीकृष्ण समझो ऐसा अर्थ है या श्रीकृष्ण को क्षेत्रज्ञ समझो ऐसा अर्थ? (१) प्रथम में अप्रसिद्ध उद्देश्य और प्रसिद्ध विधेय होगा जो न्याय संगत नहीं । ज्ञात उद्देश्य होता है, अज्ञात विधेय होता है । क्षेत्रज्ञ क्या है यह मालुम नहीं, उसे कृष्ण समझो कहने पर बोध ही नहीं होगा [जैसे देवदत्त ज्ञात है वह कैसा है मालुम नहीं तो कहा जाता है -देवदत्त पण्डित है]। (२) द्वितीय पक्ष में, मुझे ज्ञेत्रज्ञ समझो ऐसा अर्थ निकलता है, यहाँ उद्देश्य -कृष्ण ज्ञात है, क्षेत्रज्ञ अज्ञात है ऐसा ठीक जच सकता है, किन्तु एक नियम है कि

श्लोकेषु पदप्रयोगाणां छन्दोऽधीनत्वाद्योजनया बोधोत्पत्तेः स्वीकृतत्वान्मां क्षेत्रज्ञं विद्धीत्यन्वये दोषाभावात् । "एतद्यो वेत्ती" त्यादिना पूर्वमर्थनिर्देशाद् अप्रसिद्धिवारणाच्च । प्रत्युत क्षेत्रज्ञपदस्य जीवार्थकत्वे परमात्मना सह तदैक्याऽयोगेन भागत्यागलक्षणायां स्वीकर्तव्यायां पदद्वयस्यापि चैतन्यलाक्षणिकतया चैतन्यं चैतन्यं विद्धीत्यर्थे एव घटो घट इतिवच्छाब्दबोधो दुर्घटः स्यात्।

उद्देश्य का प्रथम प्रयोग होना चाहिये, विधेय का बाद में। अर्थात् मां क्षेत्रज्ञं विद्धि, इसक्रम से लिखना चाहिये।

उत्तर - श्लोकों में पदों का प्रयोग छन्द के अधीन होने से यहां दोष नहीं हैं । अन्वय करते समय मां क्षेत्रज्ञं विद्धि ऐसी पद योजना की जा सकती है। दूसरी बात यह है कि क्षेत्रज्ञ को उद्देश्य मानने में भी हर्जा नहीं है । क्यों कि पूर्व श्लोक में "एतद्यो वेत्ति तं प्राहुः क्षेत्रज्ञ इति" इस प्रकार क्षेत्रज्ञ का निर्वचन कर चुके हैं । अत एव वह अज्ञात नहीं है। अद्वैत मत में तो क्षेत्रज्ञ पद का अर्थ जीवात्मा होने से परमात्मा के साथ उसका अभेद असंभव हो जाता है और तदर्थ भागत्यागलक्षणा करनी पडेगी सो भी दोनों पदों में, फलतः दोनों पदों का अर्थ चैतन्य मात्र करना होगा । तब चैतन्यं चैतन्यं ऐसा वाक्यार्थ होगा और घटो घटः के समान शाब्दबोध ही नहीं होगा।

न च क्षेत्रज्ञपदं जीवार्थे प्रसिद्धम् । तादृशप्रसिद्धिविरहात् ।" क्षेत्रज्ञोऽक्षर एव च"इत्येवं विष्णुसहस्रनामस्तोत्रे विष्णुनामतया क्षेत्रज्ञपदोक्तेश्च। अन्यथा क्षेत्रज्ञपदेनैव जीवोपस्थितौ" एतद्यो वेत्ति तं प्राहुः क्षेत्रज्ञ इति"इति तद्व्युत्पत्तिप्रदर्शनवैयर्थ्यापत्तेः। न चेश्वरार्थकत्वेऽपि तुल्यमेतदिति वाच्यम्। विशेषेण यो वेत्तीत्यर्थलाभार्थं तदुक्तेः। जीवात्मा सामान्यतो जानाति।परमात्मा तु विशेषेण जानाति

प्रश्न - क्षेत्रज्ञ पद का जीव अर्थ प्रसिद्ध है, उसे छोड कर परमात्मा अर्थ कैसे करते हो ?

उत्तर - क्षेत्रज्ञ पद का जीव अर्थ कहीं प्रसिद्ध नहीं है। बल्कि विष्णुसहस्त्रनाम में "क्षेत्रज्ञोऽक्षर एंव च" इस प्रकार विष्णु के नाम के रूप में क्षेत्रज्ञ पद आया है। जीव अर्थ प्रसिद्ध होता तो "एतद्यो वेत्ति ..... "इत्यादि व्युत्पत्ति दिखाने की क्या जरूरत थी ? यह कोई बाल पोथी तो है नहीं कि व्युत्पत्ति आदि दिखायें ।

प्रश्न - यदि क्षेत्रज्ञ शब्द का परमात्मा अर्थ प्रसिद्ध है तब भी व्युत्पत्ति दिखाना व्यर्थ होगा। यह कोई बाल पोथी नहीं ऐसा दोष आप के मत में भी आ सकता है ।

उत्तर - विशेषरूप से जो क्षेत्र को जानता है वह क्षेत्रज्ञ परमात्मा है इस अर्थ के लाभार्थ व्युत्पत्तिप्रदर्शन है। जीवात्मा क्षेत्र को

इति निर्वचनतात्पर्यार्थः।

इति द्वैतप्रबन्धपाठतच्चर्चाविषयार्थः ।

एतदुपरि श्रीकाशिकानन्दगिरिस्वामिकृतस्याऽद्वैतमतस्थापनस्य प्रवचनस्य च प्रथमोंऽशः

*अत्रोच्यते । त्वंपदार्थ-तत्पदार्थयोः षट्कद्वयेन शोधने सति असि पदार्थमैक्यं वक्तुं तृतीयषट्कमारब्धम् । अतोऽत्र वाक्ये जीवपरैक्यप्रतिपादनमेव विवक्षितोपक्षेपविधया क्रियते । तथा हि क्षेत्रज्ञपदस्य जीवात्मैवार्थः।"क्षेत्रज्ञ आत्मा पुरुष" इत्येवं कोशे

सामान्यरूप से जानता है, परमात्मा विशेषरूपसे जानता है ।

इस पर श्री स्वामी काशिकानन्दगिरिजी का अद्वैतमतस्थापनादि :-

गीता में प्रथम छः अध्यायों में त्वंपदार्थ का शोधन है। द्वितीयषट्क (छःअध्यायों)में तत्पदार्थ का शोधन है। यह तृतीय षट्क असिपदार्थ - दोनों की एकता का प्रतिपादन करता है। अतः प्रारम्भ में जीव और ब्रह्म की एकता ही उपक्रम रूप से वक्तव्य है । यही "क्षेत्रज्ञं चापि मां विद्धि" से बताया जा रहा है। क्षेत्रज्ञ पद का परमात्मा अर्थ नहीं है, किन्तु जीवात्मा ही अर्थ है। क्यों कि अमरकोश आदि में

[*अत्र विस्तृत उपक्रमभागो न लिखितोऽस्ति ।]

जीवपर्यायत्वेन तत्पाठात्। न च तत्रापि परमात्मपर्यायपाठ एवेति वाच्यम् । भवन्मते नारायणस्यैव परमात्मत्वान्नारायणपर्यायेषु पठितव्यत्वापत्तेः । आत्मशब्दोऽपि स्वरसतो जीवात्मन्येव प्रयुज्यते। अपि च"क्षेत्रज्ञ आत्मा पुरुषः प्रधानं प्रकृतिः स्त्रियाम्"इति कोशपाठे सांख्यप्रतिपादितप्रकृतिपुरुषयोरेव पर्यायोक्तिः प्रतीयते। तत्र सांख्या जिवात्मानमेव पुरुषपदार्थं मन्यन्ते। न च सांख्यमतस्य ब्रह्मसूत्रे

"क्षेत्रज्ञ आत्मा पुरुषः" इत्यादि रीति जीवात्मा के ही पर्याय के रूप में क्षेत्रज्ञ को बताया है।

पूर्वपक्ष - कोश में भी परमात्मा के ही ये पर्याय क्यों नहीं ? आत्मा पद से परमात्मा भी तो लिया जा सकता है ।

समाधान - आप के मत से नारायण ही परमात्मा होने से " विष्णुर्नारायणः" आदि के साथ ही क्षेत्रज्ञादि पदों को पढना चाहिये था । आत्मा शब्द का स्वारसिक अर्थ जीवात्मा ही है । दूसरी बात -"क्षेत्रज्ञ आत्मा पुरुषः प्रधानं प्रकृतिः स्त्रियाम्" - ऐसा कोश में पाठ है । उस से सांख्यशास्त्र में प्रतिपादित पुरुष और प्रकृति का पर्यायकथन प्रतीत होता है । सांख्यमत में जीवात्मा को ही पुरुष स्वीकार किया है ।

पूर्वपक्ष - सांख्यमत का ब्रह्मसूत्र में खण्डन किया है । उस का

खण्डितत्वात्तदर्थबोधककोशाऽप्रामाण्यमितिवाच्यम् । क्रमाभिधानाय सांख्यानुसरणात् । लोके जीवात्मनि प्रसिद्धाः क्षेत्रज्ञादिशब्दाः प्रकृतिपर्यायाश्च सांख्यप्रसिद्धेन साहचर्येण पठिता इति तत्वम् । अन्यथा कोशकारस्य सांख्यमतानुयायित्वे "विष्णुर्नारायणःकृष्ण" इत्यादीश्वरपार्यायान पठ्येरन् । सांख्यैरीश्वरानुपगमात् । न च "प्राणी तु चेतनो जन्मी जन्तु-जन्यु-शरीरिणः" इति पृथगेव जीववाचकाः पठिता इति क्षेत्रज्ञादिपदं कोशे न जीवपरमिति वाच्यम् ।

वर्णन कोशकार करें तो कोश अप्रामाणिक होगा ।

समाधान - कोश में सांख्यमत का वर्णन नहीं है । पर्यायकथन में सांख्योक्त क्रममात्र का आदर किया है । लोक में जीवात्मा के पर्यायशब्दों को और प्रकृतिपर्याय शब्दों को सांख्योक्त क्रम से बताया इतना ही मतलब है । यदि ऐसा न हो, कोशकार सांख्यमतानुयायी हो तो "विष्णुर्नारायणः कृष्ण" इत्यादि ईश्वरपर्याय ही नहीं पढते । क्यों कि सांख्यमत में ईश्वर ही नहीं माना है।

पूर्वपक्ष - कोश में "प्राणी तु चेतनो जन्मी जन्तु-जन्यु-शरीरिणः " इस प्रकार जीववाचक शब्दोंको अलग ही पढा है। अतः क्षेत्रज्ञादि पद जीववाचक नहीं हो सकते ।

"जनुर्जननजन्मानि जनिरुत्पत्तिरुद्भव" इति जन्मवाचकानि पठित्वा तादृशजन्मवतां क्षेत्रज्ञानां सोपाधिकानां कानि नामानीति जिज्ञासायां "प्राणी त्वि"त्यादिनामोक्तेः । आत्मा स्वरूपतो न सांख्यमतेन न वा वेदान्तादिमतेन जन्मवान्। ततश्च स्वरूपतो नित्य आत्मा पृथक् पठितः । उपाधिविशिष्टत्वेन जन्मवत्त्वात् "प्राणी त्वि "त्यादिना पृथक् पठितः।

एवमपि शरीरविशिष्टात्मैव क्षेत्रज्ञ इति बहवो भ्रान्ताः । तथा च क्षेत्रज्ञपदेन स एव मा ग्राहीति "एतद्यो वेत्ति तं प्राहुः क्षेत्रज्ञ इति" इति भगवदुक्तेरपि साङ्गत्यं भवति ।

समाधान - जनु, जनन, जन्म, जनि, उत्पत्ति, उद्भव इस प्रकार जन्मवाचक शब्दों को कह कर बार बार वैसे जन्मवाले(उपहित) क्षेत्रज्ञों के नाम क्या क्या है इस जिज्ञासा में "प्राणी तु चेतनोजन्मी " इत्यादि पढे गये हैं । आत्मा तो न सांख्यमत में और न वेदान्ती आदि के मत में ही जन्मवाला है । अतः स्वरूपतः नित्य आत्मा को "क्षेत्रज्ञ आत्मा पुरुषः" कहा । शरीरविशिष्ट रूप से जन्मवाले आत्मा के नाम "प्राणी तु चेतनो" इत्यादि रूप से पृथक् कहा ।"

पूर्वपक्ष - तब "एतद्यो वेत्ति तं प्राहुः क्षेत्रज्ञः" यह व्युत्पत्ति दिखाने का क्या आशय होगा ?

वेदितु:पृथगेव कर्मतया वेद्यं निर्दिश्यमानं क्षेत्रात् पृथक् क्षेत्रज्ञमुपस्थापयति । अयमर्थः । न हि क्षेत्रविशिष्ट आत्मा क्षेत्रज्ञः। येन तस्य परेणैक्यं न स्यात् । किन्तु जडस्य क्षेत्रस्य वेदिता क्षेत्राद्भिन्नोऽत एव क्षेत्रविशिष्टादपि भिन्नः क्षेत्रज्ञो जडाऽसम्भिन्न एव । तं च मां विद्धीति ।

"नन्वेवं क्षेत्रज्ञपदस्य जीवार्थकत्वे सम्भवत्यपि परमात्मार्थकत्वं न शक्यते वारयितुम् । केवलरूढ्यर्थो मा ग्राहीति "एतद्यो वेत्ति तम् " इति योगार्थप्रदर्शनोपपत्तेरिति चेन्न ।

समाधान -शारीरविशिष्ट आत्मा ही क्षेत्रज्ञ है ऐसा बहुत से लोगों को भ्रम है। क्षेत्रज्ञ का वही अर्थ इस प्रकरण में लिया न जाये इस के लिये गीता में उक्त व्युत्पत्ति का प्रदर्शन है। वेदिता (ज्ञाता) से पृथक् ही वेद्य(ज्ञेय) होता है। क्षेत्रज्ञ से पृथक् क्षेत्र है यह बात यहां बताना है। आशय यह है कि क्षेत्रविशिष्ट आत्मा क्षेत्रज्ञ नहीं, जिस से परमात्मा के साथ एकता मानने में बाधा हो। किन्तु जड क्षेत्र से भिन्न है, अत एव क्षेत्रविशिष्ट से भी भिन्न है। क्षेत्रज्ञ जड से अमिश्रित है, क्षेत्र का साक्षी है। ऐसा शुद्ध आत्मा मेरा ही(कृष्ण का ही)स्वरूप है, यही क्षेत्रज्ञं चापि मां विद्धि से कहा जा रहा है।

क्षेत्रज्ञपदस्य परमात्मार्थकत्वविरहात्। योगाद्रूढेर्बलीयस्त्वात्। अस्य पदस्य पङ्कजादिपदवद् योगरूढत्वमेव। पङ्कजादिपदं हि पङ्कजनिकर्तृत्वविशिष्टं पद्मत्वावाच्छिन्नं बोधयति। एवं क्षेत्रज्ञपदमपि। तत्र केचन शरीरविशिष्टमात्मानं क्षेत्रज्ञंपदार्थं मन्यन्त इति तद्भ्रान्तिवारणाय क्षेत्राऽसम्भिन्नार्थबोधनाय यौगिकार्थस्यात्र प्रदर्शनमित्येव युक्तम्। न च "क्षेत्रज्ञोऽक्षर एव च"इति विष्णुसहस्रनामतो विष्णावपि रूढत्वमेवेति वाच्यम्।

पूर्वपक्ष - *भले ही क्षेत्रज्ञ पद का जीवात्मा अर्थ भी हो, किन्तु परमात्मा अर्थ का वारण नहीं हो सकता। केवल रूढि अर्थ यहां विवक्षित नहीं है, यही बात बताने के लिये गीता में एतद्यो वेत्ति तं प्राहुः क्षेत्रज्ञः यह व्युत्पत्ति दिखायी है।*

समाधान -यौगिक अर्थ से रूढ अर्थ बलवान है(योगाद्रूढिर्बलीयसीयह न्याय है) परमात्म रूढ अर्थ नही है। योगार्थ का हम परित्याग नहीं करते। जैसे पङ्कज आदि शब्द योगरूढ है वैसे क्षेत्रज्ञ पद का क्षेत्रवेत्ता आत्मा अर्थ है। इतने से सिद्ध होने से पुनः यौगिक अर्थ गीता में दिखाने का तात्पर्य यही है कि शरीरविशिष्ट आत्मा न लिया जायें। पामरादि तो शरीरविशिष्ट आत्मा को ही क्षेत्रज्ञ समझते हैं।

"शक्तिग्रहं व्याकरणोपमानात् कोशासवाक्याद्" इत्यादि अभियुक्तोक्तेर्विष्णुसहस्रनामस्तोत्रस्यपदशक्तिग्राहकप्रमाणत्वविरिहात् । न हि कोशो वा व्याकरणं वा विष्णुसहस्रनाम। न च आसवाक्यत्वात् प्रमाणमिति वाच्यम् । घटपदस्य कलशोऽर्थ इत्येवं विधासवाक्यानामेव शक्तिग्राहकत्वात्। नहि क्षेत्रज्ञपदस्य विष्णुरर्थ इति सहस्रनामनि कथितं, किन्तु जपार्थतया तत्र नामानि पठ्यन्ते।

नन्वेवमपि विष्णुसहस्रनामपठिततयाविष्ण्वर्थकत्वं तस्य ध्रुवम्।

पूर्वपक्ष - विष्णुसहस्रनाम में "क्षेत्रज्ञोक्षर एव च" कहा है अतः विष्णु में भी क्षेत्रज्ञपद रूढ क्यों नहीं मानना चाहिये ?

समाधान - कौन पद किस अर्थ में रूढ है, इस में प्रमाण व्याकरण, उपमान, कोश, आसवाक्य आदि ही है, न कि विष्णुसहस्रनाम। विष्णुसहस्रनाम कोई व्याकरण या कोश नहीं है। यह पूजापाठ का ग्रन्थ है।

पूर्वपक्ष - विष्णुसहस्रनाम आसवाक्य है अतः शक्तिग्रह में प्रमाण है।

समाधान - नहीं। आसवाक्य का यहाँ अर्थ है कि प्रामाणिक आस कहे कि कलश पद का घटअर्थ है, तो वह शक्तिग्राहक है।

तथा च "शास्त्रस्था वा तन्निमित्तत्वाद्" इति न्यायेन विष्णवर्थकत्वमेवेह ग्रहीतुं युक्तमिति चेन्न । इदं सूत्रं यववराहाधिकरणस्थम्। तत्र " यवमयश्चरुर्भवती"त्यादौ चिन्तितम्। यवपदस्य दीर्घशूके प्रियङ्गौ च प्रयोगादुभयमुख्यार्थता वाऽन्यतरमुख्यार्थता वेति। अविशेषादुभयार्थे प्राप्ते आह - "शास्त्रस्था वा" इति। "यत्रान्या ओषधयो म्लायन्ते अथैते मोदमाना इवोत्तिष्ठन्ती" ति वाक्यशेषात् शास्त्रस्था दीर्घशूका एव ग्राह्याः "वसन्ते सर्वसस्यानां जायते पत्रशातनम् । मोदमानाश्च तिष्ठन्ति यवाः कणिशशालिनः" इति च तदुपोद्बलकम् । एवं च शक्तिर्दीर्घशूकेषु, तत्सादृश्याल्लक्षणा प्रियङ्गुषु इति। प्रकृते तु कोशादिना क्षेत्रज्ञपदस्य जीवरूढत्वे निश्चिते प्रयोजनान्तरपठितस्तोत्रस्य नार्थनिर्णायकत्वम् ।

विष्णुसहस्रनाम में क्षेत्रज्ञ का विष्णु अर्थ है ऐसा नहीं बताया है। वहां तो जप के लिये नामसङ्ग्रह है।

पूर्वपक्ष - फिर भी विष्णुसहस्रनाम में विष्णु के नाम के रूप में क्षेत्रज्ञ को पढा ही है। तब "शास्त्रस्था वा तन्निमित्तत्वात्" इस मीमांसा सूत्र के अनुसार शास्त्र व्याख्या के लिये शास्त्रोक्त अर्थग्रहण करना ही उचित है।

समाधान - यह मीमांसासूत्र यववराहाधिकरण में आया है। वहाँ विचार किया है कि "यवमयश्चरुर्भवति" इस विधि में यव पद का

प्रत्युत निगमनिरुक्तकव्याकरणादिशास्त्र निरूपणीयार्थस्य शास्त्रस्थत्वेऽपि तं परित्यज्य(योगं परित्यज्य)पिकनेमाधिकरणे म्लेच्छरूढ कोकिलाद्यर्थत्वमेव पिकादिपदानां निर्णीतम्। "यानि नामानि गौणानि विख्यातानि महात्मन" इत्येवं विष्णुसहस्त्रनामन्येव गौणार्थतया प्रयुक्तत्वकथनान्मुख्यार्थतात्पर्याभावाच्च। अन्यथा "रौद्रं चरुं निर्वपेद्"इत्यादौ"रुद्रो बहुशिरा बभ्रुरि"त्येवं पाठाद् वैष्णवचरुर्निर्वपणं स्यादित्ति सकलमिमांसाविप्लव आपद्येत । "यस्यै देवतायै हविर्गृहीतं स्यात्तां ध्यायेद्वषट्करिष्यन्नि" त्यादिवचनानां

अर्थ क्या है? जौं अर्थ है या प्रियङ्गु? (काकनी) दोनों में प्रयोग होने से किसी से भी यज्ञार्थ चरु बनाया जा सकता है ऐसा पूर्वपक्ष हुआ तो उत्तर दिया कि सन्देह स्थल में शास्त्रोक्त पक्ष लेना चाहिये। वाक्यशेष में बताया है अन्य ओषधियां (अनाज)सूखने लगती है तो तब यव खिलने लगते हैं। यह लक्षण जौं में ही है । अतः जौं ही वहाँ अर्थ है।

प्रकृत में कोई सन्देह है नहीं। कोश से जीवात्मा अर्थ निश्चित है, विष्णुसहस्त्रनाम अर्थनिर्णयार्थ नहीं है उस का प्रयोजन जपादि है। "यानि नामानि गौणानि" इस प्रकार स्वयं वहाँ गौणनाम बताया है। अतः मुख्य अर्थ प्राप्त ही नहीं है। यदि विष्णुसहस्त्रनाम को

चानर्थक्यं स्याद्। आदित्य-सोम-वसु-यमप्रभृतीनं तत्र (विष्णुसहस्त्रनामनि) पाठात्।

इति श्रीकाशिकानन्दीयप्रवचनैकांशः ।

****

अथ क्षेत्रज्ञपदस्य यौगिकार्थः परमात्मैवात्र विवक्षितः। जीवस्य क्षेत्रविषयक सम्यग्ज्ञानाभावात्। "महाभूतान्यहङ्कार" इत्यादिना

अर्थनिर्णायक मानेंगे तो" रुद्रो बहुशिरा बभ्रुः" इस प्रकार वहाँ पाठ होने से रुद्र का भी अर्थ विष्णु हो जायेगा । पूरी मीमांसा में उथल पुथल होगा । वेद में कहा है - जिस देवता के लिये हवि उठायें आगे हवन के लिये उस का ध्यान करें । विष्णुसहस्त्रनाम में आदित्य, सोम, वसु, यम आदि बहुत नाम आये हैं तो सर्वत्र विष्णु का ध्यान मीमांसा संमत है क्या? कदापि नहीं। वैसा हो तो " यस्यै देवतायै" इत्यादि वाक्य ही व्यर्थ हो जायगा ।
श्री काशिकानन्दगिरिजी के प्रवचन का एक अंश यहाँ तक हुआ ।

****

।। द्वैतवादियों का पूर्वपक्ष एवं प्रवचनादि का द्वितीय अंश ।।

क्षेत्रज्ञ पद का यौगिक अर्थ परमात्मा ही " क्षेत्रज्ञं चापि मां विद्धि " में विवक्षित है । क्यों कि जीव को सकलक्षेत्र विषयक सम्यंक्

क्षेत्रवर्णनात्तस्यैतच्छरीरमात्रग्रहणेऽनुपपन्नत्वात् । किं च क्षेत्रज्ञशब्दस्य जीवार्थकत्वे "क्षेत्रज्ञं चापि मां विद्धी" त्यस्यानुपपत्तिः । न हि सर्वज्ञ-सर्वशक्तपरमेश्वरस्याल्पज्ञाऽल्पशक्तजीवेनैक्यंयुक्तम् । न च भागत्यागलक्षणया चैतन्यैक्यविवक्षणाददोषः। उभयपदलक्षणापत्तेरेव दोषत्वात् । चैतन्यं चैतन्यं विद्धीत्यर्थकतायां घटो घट इतिवच्छाब्दबोधानुपपत्तेश्च । विभक्तेरभेदार्थकतया तत्त्यागस्यापि दोषत्वाद् अभेदस्य प्रकारतया भवन्मते भानाभावात्तथा

ज्ञान नहीं है । "महाभूतान्यहङ्कार" इत्यादि से पूरे जगत का क्षेत्ररूप में परिगणन किया है। केवल इसी शरीर को लेंगे तो वह परिगणन असंगत होगा । अतः रूढित्याग उचित है। दूसरी बात- क्षेत्रज्ञ शब्द का जीव अर्थ हो तो यह अल्पज्ञ अल्पशक्तिमान जीव की सर्वज्ञ सर्वशक्तिमान ईश्वर के साथ एकता संभव नहीं, अतः भागत्याग लक्षणा माननी पडेगी । उस पर भी दोनों पदों में लक्षणा आवश्यक होने से महान दोष होगा । पहले बता चुके है कि भागत्याग से क्षेत्रज्ञं और मां इन दोनों का चैतन्य मात्र अर्थ होगा । तब घटो घटः के समान शाब्दबोध ही नहीं होगा । अद्वैतमत में क्षेत्रज्ञं में और मां में जो द्वितीया विभक्ति है उस का अर्थ भी छोडना पडेगा । अभेद विभक्ति का अर्थ है । विशेषणरूप से उस का भी भान अद्वैती नहीं मानते । क्यों कि उस का प्रकाररूप से भान मानेंगे तो अखण्डाकार

सत्यखण्डाकारताभङ्गप्रसङ्गात् । किं च"क्षेत्रज्ञं चापि मां विद्धि" इत्यैक्यप्रतिपादनोत्तरं"द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव च-उत्तमः पुरुषस्त्वन्य"इति पुनर्भेदवर्णनं वान्ताशितामात्रं स्यात्। न च तत्त्वमसी"ति वाक्यानुसारेण जीवपरैक्यमिह विवक्षितमिति वाच्यम्। महावाक्येऽपि जीवपरैक्यविवक्षाविरहात् । तत्त्वमसीत्यत्र"सुपां सुलुगि"ति सूत्रेण'सु' इत्यादेशात् तस्मात्, तस्मिन् इत्याद्यर्थोपपत्तेः। अत एव ततः पूर्वं"सन्मूलाः सोम्येमाः प्रजाः सदायतनाःसत्प्रतिष्ठाः"

वृत्ति नहीं होगी । यह भी विचारणीय होगा कि "क्षेत्रज्ञं चापि मां विद्धि" इस प्रकार जीव और ब्रह्म में एकता बताने के बाद"द्वाविमौ पुरुषौ लोके" इस प्रकार अनेकता की बात कैसे उठायी ? "उत्तमः पुरुषस्त्वन्यः" इस प्रकार भेद कैसे बताया ? क्या यह वान्ताशिता(थूंककर चाटना) नहीं होगी?"

प्रश्न - तत्त्वमसि इस श्रुति में जीवब्रह्मैक्य बताया है। उसी के अनुसार"क्षेत्रज्ञं चापि मां विद्धि"यह एकता प्रतिपादन है। और निरुपहित या मायोपाहित ब्रह्म(ईश्वर)में अविद्याविशिष्ट जीव के व्यावहारिक भेद का अनुवाद मात्र"उत्तमः पुरुषस्त्वन्य" आदि में किया गया है ।

उत्तर - महावाक्य तत्त्वमसि में भी जीव और ब्रह्म की एकता

इत्युक्तम्। सतो जातत्वात्सान्मूलाः, सति वासात् सदायतनाः सत्येव प्रतिष्ठितत्वात्सत्प्रतिष्ठाः। एवमत्रापि तस्मात्त्वं तस्मिंस्त्वमित्येवं तन्मूलत्वं तदायतनत्वं तत्प्रतिष्ठत्वं चोच्यत इति न जीवपरैक्यं तत्त्वमसिवाक्यार्थः।

इति द्वैतिपूर्वपक्षप्रवचनादिसङ्ग्रहः।

****

की विवक्षा नहीं है "तत्" में पञ्चमी या सप्तमी का" सुपां सुलुक् " इस सूत्र से वैदिक 'सु' आदेश हुआ है। तस्मात् या तस्मिन् ऐसा असलीरूप है। उस ब्रह्म से तुम उत्पन्न हुए हो, उस ब्रह्म में तुम रहते हो, इत्यादि वाक्यार्थ है। इस से पूर्व आये वाक्य से यह अर्थ स्पष्ट होता है। पूर्ववाक्य है" सन्मूलाः सोम्येमाः प्रजाः सदायतनाः सत्प्रतिष्ठाः " (प्रजा का मूल सत् ब्रह्म है, वही उस का घर है, उसी में अन्ततः प्रजा लीन होती है)इसी प्रकार यहाँ भी तस्मात्त्व तस्मिंस्त्वं-तन्मूलस्त्वं तदायतनस्त्वं तत्प्रतिष्ठस्त्वं अर्थ कीजिये। (यह द्वैतवादियों की स्वपक्षसाधक चर्चा का द्वितीय अंश हुआ)

****

<u>अद्वैतपक्ष</u> - श्री स्वामी काशिकानन्द गिरिजी के शास्त्रार्थ एवं प्रवचन का संक्षिप्त द्वितीय अंश ।

अत्रोच्यते। इदं शरीरमित्येवमिदन्तया प्रत्यक्षनिर्देशात् शरीरत्वोक्तेश्च नात्र महाभूतान्यहङ्कार इत्यादीनां ग्रहणम्। न च परमात्मनः सर्वप्रत्यक्षत्वाद् इदं महाभूतादिकम् इत्येवं भगवता श्रीकृष्णेन प्रत्यक्षतया शक्यं व्यपदेष्टुमिति वाच्यम्। श्रोतारं बोधयितुमेव वाक्यप्रयोगाच्छ्रोतृणां चेदंत्वेन महाभूताहङ्काराव्यक्तादीनां प्रत्यक्षत्वविरहात्। ननु "जन्माद्यस्य यतः" इत्यत्रास्येति इदंपदेन सर्वप्रपञ्चग्रहणवदिहापीदमित्यनेनसर्वप्रपञ्च ग्रहणं संभवतीति चेन्न। तत्र "यतो वा इमनि भूतानि जायन्त" इत्यादि श्रुत्यर्थोपसङ्ग्राहकतया

क्षेत्र पद का आप ने "महाभूतान्यहङ्कार" इत्यादि अग्रिम श्लोकानुसार पूरा जगत अर्थ जो बताया वह संगत नहीं है। क्यों कि पूर्वश्लोक में "इदं शरीरं क्षेत्रं", ऐसे इस शरीर को क्षेत्र बताया है। "इदं" यह प्रत्यक्ष निर्देश है, संनिकृष्टनिर्देश है। क्या पूरा जगत संनिकृष्टप्रत्यक्ष है? और शरीर शब्द का भी प्रयोग है। क्या पूरा जगत हमारा शरीर है?

पूर्वपक्ष - हमारे लिये प्रत्यक्ष न हो, श्रीकृष्ण परमात्मा के लिये जगत प्रत्यक्ष है। अतः प्रत्यक्ष निर्देश असंगत नहीं है।

समाधान -श्रोता को समझाने के लिये वाक्य प्रयोग होता है। श्रोता को तो पूरा जगत् प्रत्यक्ष शरीर नहीं है।

पूर्वपक्ष -"जन्माद्यस्य यतः" इस सूत्र में 'अस्य' इस प्रकार

इदं तथा प्रयोगसंभवेऽपि प्रकृते शरीरविशेषणतया प्रत्यक्षनिर्देशस्यैव क्रियमाणत्वात् । अन्यथा चेदमित्यनेन सर्वजगद्ग्रहणे शरीरपदस्य वैयर्थ्यं स्पष्टमेव ।

ननु श्रुणाति हिंसति परिणमयति महदहङ्कारादिरूपेणेतिशर् । भगवता ईर्यमाणत्वात्, प्रेर्यमाणत्वाद् ईरम् । शर् च ईरं च शरीरम् । तच्चाव्यक्तमहदादिकं सर्वमेव नाशनत्वाद् भगवत्प्रेर्यमाणत्वाच्च। तदिदमव्यक्तमहदहङ्कारमहाभूतादिरूपं शरीरं क्षेत्रं,"क्षि निवासे" भगवन्निवसभूतमित्यर्थ इति व्याख्यानाददोष इति चेन्न ।

पद से समस्त जगत कहा गया । वैसे यहाँ भी सम्भव है ।

समाधान -"यतो वा इमानि भूतानि जायन्ते" इस श्रुति को अनुगत करने के लिये सूत्र में इदं पद है। श्रुति में कालदेशादि नियम नहीं होता। दूसरी बात यह है कि इदं पद से सर्व जगत का ग्रहण हो गया तो 'शरीरं' बोलने की क्या जरूरत रह गयी? वह व्यर्थ और सन्देहजनक ही होगा।

पूर्वपक्ष -शरीरं का देह अर्थ नहीं है। शर और ईर ऐसे दो शब्द मिला कर शरीर हुआ है। "शॄ हिंसायां", "ईर प्रेरणे" ऐसे दो धातु हैं। यह जगत परिणामी है और ईश्वर प्रेरित है। अतः शरीर है। क्षेत्र का भी अर्थ दूसरा है।" क्षि निवासे" धातु से क्षेत्र शब्द बना है । अर्थात्

शरीरपदस्य रूढ्यर्थपरित्यागात्। किं च इदं महाभूतादिकं नाशनेर्यमाणात्मकशरीरं भवति। तच्च क्षेत्रमितिव्याख्यायां वाक्यभेदोऽत्र महान् दोषः। एकवाक्यत्वेन प्रतीयमाने विधेयभेदस्वीकारात्। ननु पर्वतोवन्हिमान् धूमादित्यत्र क्रमे वाक्यद्वयसत्वेऽपि धूमवान् पर्वतो वन्हिमानिति कथने न वाक्यभेदोऽस्ति। तद्वदिहापीति चेन्न। विशेषणविशेष्यभावव्यत्यासमात्रेणैकवाक्यत्वायोगात्"ग्रहं संमार्ष्टि"

भगवान का निवासस्थान क्षेत्र है ।

समाधान -ऐसा उटपटांग अर्थ इस लिये नहीं हो सकता है क्योंकि यौगिक अर्थ से रूढि अर्थ बलवान होता है। दूसरी बात यह है कि ये महाभूताहंकारादि शर् और ईर है, वह शरीर क्षेत्र है इस प्रकार व्याख्या करने पर वाक्यभेद दोष आयेगा। मीमांसा में जहाँ एकवाक्य प्रतीत होता है वहां वाक्यभेद करना महान दोष माना गया है ।

पूर्वपक्ष -"पर्वत वह्निमान है,क्यों कि वहां धूम है"यहाँ दो वाक्य है। किन्तु"धूमवाला पर्वत वह्निमान है"यहाँ वाक्यभेद नहीं है। वैसे यहाँ पर भी विशेषण-विशेष्यभाव बदल देने से वाक्यभेद नहीं होगा।

उत्तर -विशेषण विशेष्य बदलने मात्र से वाक्य भेद दोष दूर नहीं

इत्यत्रैकत्ववद्ग्रहं समृज्यादिति व्याख्यामात्रेण न वाक्यभेदपरिहारोऽस्ति । तत्र ग्रहसम्मार्जनं कुर्यात्; स चैक इति विधेयभेदेन वाक्यभेद एव भवति । अत एव तत्रैकत्वसंख्याया अविवक्षितत्वं सिद्धान्तितम् । न च तत्रानेकवाक्यत्वमपि भवति अर्थैकत्वादेकवाक्यत्वमपीति वाच्यम् । तदा क्वचिदेकग्रहमात्रसंमार्जनं क्वचिच्च संख्याया अविवक्षया सर्वग्रहसंमार्जनमिति अष्टदोषदुष्टविकल्पापत्तिः। वस्तुतः सर्वग्रहसंमार्जन सिद्धान्तादेकपक्षे कर्मवैगुण्यमेव स्यात् ।

होता। वेद में यज्ञस्थलीय वाक्य है -ग्रहं संमार्ष्टि । सोमपात्र का प्रोक्षण करो । एक ही पात्र का कि सब का ? ग्रह यह एकवचन है अतः एक ही पात्र का मार्जन करो ऐसी व्याख्या नहीं होती क्यों कि ग्रह का मार्जन करो ग्रह एक ही हो ऐसा कहेंगे तो वाक्यभेद होगा । अतः एकत्व विधेय नहीं । फलतः सभी ग्रह मार्जनीय है ऐसा सिद्धान्त किया है । आप के कथनानुसार विशेषण विशेष्य बदलने से एक संख्या वाला ग्रह(एक ग्रह)का मार्जन करो ऐसा एक वाक्य बन जायेगा । किन्तु वह सिद्धान्त विरुद्ध है। अर्थैकत्वादेकं वाक्यं" आदि कह कर विवक्षानुसार कभी एकवाक्यता और कहीं वाक्यभेद मानेंगे तो कर्मवैगुण्य अवश्यंभावी है। विकल्प मानने पर मीमांसोक्त अष्टदोष आ जायेंगे ।

पर्वतो वन्हिमान् धूमादित्येतत्समानार्थतायां धूमवान् पर्वतो वन्हिमानित्यत्र यतो धूमवानतो वन्हिमानित्यर्थकत्वाद् वन्हौ धूमज्ञानज्ञाप्यत्वं पर्वतस्य वन्हिमत्वं च विधेयमिति विधेयभेदेन वाक्यभेद एव । धूमप्रयोज्यताया वन्हावविवक्षायां ग्रहैकत्वाऽविवक्षावदेवेति धूमवत्वविशेषणवैयर्थ्यमेव । धूमरहितेऽपि वन्हिसम्भवात् । एवं शरीरंत्वाविवक्षायां वाक्यभेददोषवारणं तु भवति । परन्तु विशेषणवैयर्थ्यं दुर्वारम् । इदंपदेन तदा सर्वप्रपञ्चग्रहणाद् व्यावर्त्यविरहात् । "प्रासे कर्मणि नानेको विधातुं शक्यते गुण"

"धूमवान् पर्वतो वन्हिमान्" यहाँ भी एकवाक्यता नहीं है । चूंकि पर्वत धूमवान है अतः वन्हिमान है ऐसा उसका अर्थ है । तब वह्नि में धूमज्ञानज्ञाप्यत्व और पर्वत में वह्निमत्व ऐसे दो विधेय होंगे ही, तब वाक्य भेद भी निश्चित है । यदि वह्नि में धूमज्ञानज्ञाप्यता की अविवक्षा है, जैसे ग्रह में एकत्व की, तब, पर्वतो वन्हिमान् धूमात् के साथ एकार्थता नहीं होगी । क्यों कि उस में धूमज्ञानज्ञाप्यत्व विवक्षित है। धूमात् इस पञ्च्मी का ज्ञानज्ञाप्यत्व अर्थ है। हाँ ग्रह में एकत्व की अविवक्षा के समान शरीरं की अविवक्षा करेंगे तो वाक्यभेद दोष तो निवृत्त होगा, किन्तु शरीरं यह उच्चारण व्यर्थ होगा। शरीर कहना निरर्थक हो जायेगा । आचार्य भट्टकुमारिल ने भी प्रास में अनेक विधान करना अशक्य बताया है। शरीरत्वविशिष्टक्षेत्रत्व

इतिवदत्रापि ज्ञातमुद्देश्यमादाय शरीरत्वविशिष्टक्षेत्रत्व शरिरत्वक्षेत्रत्वादिगुणानामेकयत्नेन विधातुम् अशक्यत्वात् । यागस्याऽप्राप्तत्वे मुख्यविधेयतया तदवच्छेदकतया गुणानां क्रोडीकरणं स्यादिति युज्यते "अप्राप्ते तु विधीयन्ते बहवोऽप्येकयत्नतः " इति । न तथाऽन्यतमस्य विधेयत्वमपरेषाममुख्यत्वेन तदवच्छेदकत्वं प्रकृते संभवतीति वाक्यभेदो दुरुद्धर इति संभवन्त्यामेकवाक्यतायां वाक्यभेदस्वीकारोऽन्याय्य एव ।

ननु महाभूतान्यहङ्कार इत्यादिक्षेत्रवर्णनमेतच्छरीरमात्रस्य क्षेत्रत्वविवक्षायां नोपपद्येतेति चेन्न ।

का विधान भी नहीं हो सकता । विनिगमनाविरहात् क्षेत्रत्वविशिष्टशरीरत्व विधेय क्यों नहीं यह प्रश्न उठेगा । तब गुरुभूत दो विधेय हो जायेंगे । अतः वाक्यभेद दोष का वारण असंभव होगा । जहाँ एकवाक्यता प्रतीत होती है और संभव है वहाँ वाक्यभेद माना नहीं जाता ।

पूर्वपक्ष - किन्तु क्षेत्र का वर्णन करते समय महाभूतान्यहङ्कार आदि सभी आगये तो इस शरीर मात्र को क्षेत्र कैसे कह सकते हैं ? इस का क्या जवाब ?

यतो नहि क्षेत्रवर्णनमात्रं तत्र । "तत्क्षेत्रं यच्च यादृक् च यद्विकारि यतश्च यत्" इत्येवमुपक्रमेण प्रकार-विकार-कारणादि-सर्ववर्णनात्मकत्वात् । एतच्छरीरेऽपि महाभूताहङ्कारबुद्ध्यव्यक्तादीनामुपादानविधया सत्वात् । अत एव एतत्क्षेत्रं समासेन सविकारमुदाहृतमित्युपसंहारः । तत्र सविकारमित्यनेन सप्रकार-सकारणादिकमपि लक्ष्यते । उपक्रमानुरोधात् । तस्मात् क्षेत्रपदार्थ एतच्छरीरमेव, तद्वेत्ता-तत्प्रकाशको जीव एवात्र क्षेत्रज्ञपदार्थ इति क्षेत्रज्ञं चापि मां विद्धीति जीवपरैक्यकथनमेव ।

समाधान -"महाभूतान्यहङ्कार" इत्यादि केवल क्षेत्र का वर्णनि नहीं है । क्यों कि उपक्रम में "तत्क्षेत्रं यच्च यादृक् च यद्विकारि यतश्च यत्" इन सब का वर्णन प्रतिज्ञात है । इस शरीर में कारणरूप से महाभूतदि प्रविष्ट है । संघात इस का स्वरूप है अहंकारादि प्रकार है इत्यादि रूप से क्षेत्र, कारण, प्रकार आदि सब का यह वर्णन है । उपसंहार में "सविकारमुदाहृतं" कहा । "सविकार सकारण सप्रकार " यह उस का अर्थ है । क्यों कि उपक्रम में सभी बताये हैं । फलतः क्षेत्र पद का यह शरीर ही अर्थ है । उसका वेत्ता - प्रकाशक जीवात्मा ही क्षेत्रज्ञ है । उस की परमात्मा के साथ एकता ही क्षेत्रज्ञं चापि मां विद्धि का अर्थ है ।

ननु विरुद्धस्वभावयोर्जीवपरयोरैक्यं न शब्देन बोधयितुं शक्यम् । लक्षणायां तु, स एव दोष इति चेन्न । भागत्यागलक्षणायांदोषाभावात् । न हि लक्षणेत्येव दोषत्वम् । दोषतायां हि बीजं वक्तव्यम् । वस्तुतः शब्दबोधे विलम्बो हि दोषताबीजम् । यथा गङ्गायां घोष इत्यत्र प्रथमं प्रवाहोपस्थितौ तत्र घोषस्य वृत्त्यसंभवात् तीरे लक्षणा, ततस्तीरोपस्थितिः, ततः शब्दबोध इति स्पष्टो विलम्बः । "सोऽयं" ,"तत्त्वमसि" इत्यादौ तु नैष दोषः । विशिष्टोपस्थितौ विशेष्यस्योपस्थिततया पृथक् तदुपस्थित्यनपेक्षणात् । विरोधेन विशेषणत्यागमात्रस्यापेक्षितत्वात्। तथा च विशेषणत्यागसमकालमेव शाब्दबोधो भवतीति न शाब्दबोधविलम्बः ।

पूर्वपक्ष - यह हम कह चुके कि अल्पज्ञ - सर्वज्ञ, जीव - ईश्वर की एकता संभव नहीं । भगत्यागलक्षणा करेंगे तो वही दोष है ।

समाधान - लक्षणा क्यों दोष है ? इस में हेतु तो कहना होगा । वस्तुतः लक्षणास्थल में दोष है - शाब्दबोध में विलम्ब ।'गङ्गायां घोषः' कहने पर प्रथम प्रवाह में झोंपडी अर्थ उपस्थित होगा । प्रवाह में झोंपडी नहीं हो सकती । अतः लक्षणा से तीर की उपस्थिति बाद में होगी अतः बोध में विलम्ब होता है । भागत्यागमें शाब्दबोध विलम्ब नहीं है । क्यों कि ग्राह्यभाग उपस्थित है, तब त्याज्य भाग के त्याग के समय में ही शाब्दबोध हो जाता है ।

योग्यान्वयमात्रेणै वोपपत्तौ विशेषणत्यागोऽप्यनावश्यक इति मत्वा नैयायिकादयो जहदजहल्लक्षणामेव नाभ्युपजग्मुः । परिभाषाकारोऽपि भागत्यागलक्षणां नोरीचकार । सम्प्रदायविदस्त्वखण्डाकार वृत्तौ विषयान्तरप्रवेशस्यायुक्तत्वाद् भागत्यागं स्थापयन्ति । सर्वथापि न क्लेशप्रयुक्तमपि दोषत्वम् । लक्षणापक्षेऽपि निरूढत्वात् । भवन्मते तु तत्पदस्येश्वरार्थकत्वात्तन्मूलकजीवस्य पृथगुपस्थित्यावश्यकत्वात् शाब्दबोधविलम्ब उपस्थितौ क्लेशश्च दुर्वार एव, लक्षणाया निरूढत्वविरहादिति नैकपदमात्रलक्षणामुक्त्वा श्रेयस्त्वं शक्यं स्थापयितुम् ।

यही कारण है नैयायिकों ने सोऽयम् इत्यादि में योग्य विशेष्यों के अन्वय से ही काम चल जाता है, लक्षणा ही मत करो, यह माना । वेदान्तपरिभाषाकार ने भी भागत्याग नहीं माना । परमसिद्धान्त में अखण्डाकारवृत्ति के लिये भागत्याग आवश्यक होने से माना । सर्वथापि शाब्दबोध में विलम्ब तो होता ही नहीं है । क्लेश भी नहीं । क्यों कि यह विरुढ लक्षणा है । जैसे "सोऽयं" में । आप के मत में तत्त्वमसि में तत् का तदायतनादि अर्थ क्लिष्ट मार्ग से मिलेगा । शाब्दबोध में विलम्ब भी होगा । अतः लक्षणादोष निश्चित है। अत एव अद्वैत मत में दोनों पदों में लक्षणा है, हमारे मत में एक ही पद में लक्षणा है कह कर स्वमत स्थापन करना भी संभव नही है।

नन्वेवमपि उभयत्र भागत्यागे चैतन्यं चैतन्यमिति घटो घट इतिवत् स्यात् । उद्देश्यतावच्छेदकविधेययोरैक्यादितिशाब्दबोध एव न स्यादिति चेन्न । अखण्डाकारबोधस्यैव स्वीकृतत्वेनोद्देश्यतावच्छेदकादिविरहेणतदैक्यप्रश्नानुत्थानात्। न चैवं वाक्यवैयर्थ्यम् एकपदेनैव गतार्थत्वं वेति वाच्यम् । भेदवारणाय पदद्वयोपयोगात् । सोऽयमित्यादौ तस्य् सर्वानुभवात् । न च विभक्तेरभेदार्थकतया तत्त्यागो दोषः ।

पूर्वपक्ष - फिर भी अद्वैत मत में दोनों पदों का चैतन्य मात्र अर्थ होने से चैतन्यं चैतन्यं कहना घटो घटः के समान होगा । उद्देश्य और विधोय एक हो जाने से शाब्दबोध नहीं होगा ।

उत्तर - अद्वैत मत में अखण्डाकार बोध होता है । वहाँ उद्देश्य विधेय भाव न होने से उन दोनों की एकता की आपत्ति नहीं है ।

पूर्वपक्ष - तब वाक्य व्यर्थ होगा । या दो में से एक पद की व्यर्थता होगी ।

उत्तर -परस्पर भेद निवृत्ति प्रयोजन है । जैसे -"सोऽयं"में ।

पूर्वपक्ष - विभक्ति का अभेदार्थ परित्यक्त होगा ।

नीलो घटः, नीलं घटं, नीलेन घटेनेत्यादौ सर्वासां विभक्तीनामभेदोऽप्यर्थ इति नानार्थताप्रसङ्गादभेदेनान्वयमात्रादुपपत्तेश्च अभेदार्थकत्वं नास्त्येव विभक्तीनाम् । साधुत्वमात्रार्थतया विभक्तेः प्रयोगात् । वस्तुतस्तु तत्त्वमसीत्यादौ नास्त्येव परोक्षात्मकः शाब्दबोधः । किन्तु साक्षात्कार एवाखण्डाकारवृत्तिरूपो भवतीति नोद्देश्यतावच्छेदकविधेयैक्यादिशङ्काया एवावसरः । न च शब्दादपरोक्षज्ञानं न भवतीति वाच्यम् । उपदिशन्तमेव सनत्कुमारमुद्दिश्य "तमसस्पारं दर्शयति भगवान् सनत्कुमार" इत्येवं दर्शनानुकूलव्यापारवत्त्वोक्तेः । दशमस्त्वमसीत्यादौ

उत्तर - विभक्ति का अभेद अर्थ है ही नहीं । नीलः घटः, नीलं घटं, नीलेन घटेन इन सब विभक्तियों का अभेद अर्थ भी मानना होगा, तब नानार्थता होगी । अतः शब्दसाधुत्व के लिये विशेषणपदोत्तर विभक्ति है । वस्तुतः तत्त्वमसि आदि में ऐक्यसाक्षात्कार ही होता है परोक्षबोध नहीं । वहाँ उद्देश्य विधेयादि होता ही नहीं ।

पूर्वपक्ष - शब्द से अपरोक्ष ज्ञान नहीं होता। परोक्ष ही होगा।

उत्तर - श्रुति में उपदेश करते हुए सनतकुमार को बताया ये नारदजी को सक्षात्कार करा रहे हैं -"तमसस्पारं दर्शयति" । ' दशमस्त्वं' इस वाक्य से दसवें अपने का साक्षात्कार ही होता है, न

शब्दादपरोक्षत्वमाचार्यैः स्थापितम् ।

ननु जीवेश्वरयोरेकत्वे पूज्यत्व-पूजकत्व; भक्तत्व-भजनीयत्वादिभावविरहात् स्वकर्मणा तमभ्यच्र्च्येत्युक्तार्च्यत्वाऽर्चकत्वभावविरहाच्च कर्मोपासनादिरहितस्य मोक्षोऽपि दुर्घट एव स्यादिति चेन्न । वास्तविकभेदे एव पूज्यत्वभजनीयत्वाद्यनुपपत्तेः । बाष्पयाने (ट्रेन्)तृतीयश्रेण्याम्(अद्यत्वे द्वितीयश्रेणी)उपवेशने(सीट्)पादौ प्रसार्योपविष्टं मामाह अपरो यात्री -आकुञ्चय पादौ कुतः प्रसार्योपविशसि ? ममापि पार्श्वे अधिपत्रं(टिकिट्)विद्यत इति ।

कि परोक्षज्ञान ।

पूर्वपक्ष - यदि जीव और ईश्वर की एकता है तो कौन पूजक और कौन पूज्य ? "स्वकर्मणा तमभ्यर्च्य" यहाँ अर्चनीय कौन अर्चक कौन ? इस प्रकार कर्म और उपासना नहीं रही तो मोक्ष भी नहीं होगा ।

उत्तर - वास्तविक भेद होने पर ही पूज्य - पूजक भाव नहीं रहेगा । ट्रेन में हम द्वितीय श्रेणी में जा रहे थे । सीट खाली थी तो पांव पसार कर लेटे । एक दूसरा यात्री आया । वह बोलने लगा - क्यों पूरी सीट कब्जा किये हो ? मेरे पास भी टिकट है ।

एवं द्वैतिनो ब्रुवन्ति भगवन्तं -कुतो जगत् सर्वं व्याप्य नारायणस्त्वं स्थितः ? त्वमेव कथमेकसत्ताकः ? ममापि पार्श्वे सत्ता विद्यत इति । एवं समानसत्ताकत्वे कथम् अर्चकार्चनीयभावः ? अद्वैतिनो वयं परमेश्वरसत्तातिरिक्तसत्तां न क्वापि मन्यामहे । व्यावहारिकसत्ताकं भेदमादाय त्वच्यर्याचिकादिभावः । नापि भेदे सति वास्तवकी भक्तिर्भवति । "न वा अरे पत्युः कामाय पतिः प्रियो भवति । आत्मनस्तु कामाय पतिः प्रियो भवति । न वा अरे सर्वस्यकामाय सर्वं प्रियं भवति आत्मनस्तु कामाय सर्वं प्रियं भवति" "पुत्रात्प्रेयो वित्तात्प्रेयोऽन्यस्मात्सर्वस्मादन्तरतरंयदयमात्मा" इत्यादिश्रुतेर्भगवद्

पांव समेटो । मुझे दूसरी सीट पर नहीं, यहीं बैठना है । यही हालत द्वैतियों का है । वे कहते है - क्यों परमात्मा तुम सारे जगत में पांव पसारकर बैठे हो । हमारी भी सत्ता है । एक कोने में(वैकुण्ठ में)बैठो । अब बोलो कैसी अर्चनीयता और अर्चकता ? हम अद्वैती कहते हैं - परमेश्वर की सत्ता से अतिरिक्त हमारी कोई सत्ता नहीं है । व्यावहारिक भेद को लेकर अर्चनीय - अर्चक भाव है । भेद रहने पर भक्ति भी बनेगी नहीं । "न वा अरे पत्युः कामाय पतिः प्रियो भवति ---- न वा अरे सर्वस्य कामाय सर्वं प्रियं" इत्यादि श्रुति समूह में स्पष्ट कहा है - आत्मा में ही सब का परम प्रेम होता है । पुत्र से वित्त से एवं अन्य सब से अधिक प्रिय आत्मा ही है

भजनस्यात्मसुखार्थत्वेन आत्मन्येव परमप्रेमोपपत्तेः । यथा फलार्थं वृक्षप्रेमणि क्रियमाणे मुख्यं फलप्रेम गौणं वृक्षप्रेम, तथा आत्मार्थं भगवति प्रीयमाणे आत्मनि मुख्यं प्रेम, भगवति गौणं प्रेम स्यात् । फलमप्रददतं यथा लोकाः कर्त्तयित्वाऽपसारयन्ति वृक्षं, तथा फलमप्रददतं भगवन्तमपीमे द्वैतिनः ....। अद्वैतिनां पुनरात्मनि विद्यमानमेव परं प्रेम जीवात्मपरमत्मैक्यज्ञाने परमात्मनि प्रसरतींति वस्तविकी परा भक्तिः परमात्मन्यद्वैतिनामेव ।

[इतःपरं द्वैतवादिभिः कृतेन कोलाहलेन प्रवचनावरोधः सञ्जातः]

इति श्रीकाशिकानन्दीयप्रवचनशेषांशः ।

यह भी श्रुति है । जैसे फल के लिये वृक्ष पर प्रेम करते हैं तो मुख्य प्रेम फल पर है, वृक्ष पर गौण प्रेम है, वैसे आत्मार्थ भगवत्प्रेम होने से मुख्य प्रेम आत्मा में और गौण प्रेम ईश्वर में होगा । क्या यही भक्ति है ? फल न देने वाले वृक्ष को लोग काट कर फेंक् देते हैं, वैसे फल न देने पर ईश्वर को ये द्वैतवादी भी पता नहीं क्या करेंगे । अद्वैत मत में आत्मा में स्थित परम प्रेम ही आत्मा और परमात्मा की एकता होने पर परपत्मा में प्रसरित होगा । इस प्रकार वास्तविक परम प्रेम रूपी भक्ति अद्वैत सिद्धान्त में ही संभव है ।

[इतने पर द्वैतवादियों ने हल्ला मचा कर प्रवचन में अवरोध डाला] श्री काशिकानन्द गिरिजी के प्रवचन का यह द्वितीय अंश हुआ।

प्रथमं परिशिष्टम वक्तव्यम

ननु क्षेत्रज्ञानां परमात्मस्वरूपत्वे "तस्माद् युध्यस्व भारते"ति भगवदादेशो न युज्येत । युद्धं हि हननाकूलव्यापारः । न हि परमात्मानं हन्तुं श्रीकृष्णेनार्जुनं प्रति शक्येत दातुमादेशः । जीवाश्च भवन्मते परमात्मरूपाः । किं चेह क्षेत्रज्ञपरमात्मनोरैक्योपदेशे " द्वाविमौ पुरुषौ लोके -उत्तमःपुरुषस्त्वन्यः" इति भेदोपदेशो वान्ताशिता स्यादिति चेद्? तत् किं भवान् परमात्मनो हननं मन्यते ? "नायं हन्ति न हन्यते" "न जायते म्रियते वा" इत्यादिना जीवात्मानोऽपि हननं भवन्मतेनाऽप्यसिद्धमेव, कुतः परमात्मनो हननं प्रसज्यते ? युद्धं तु कर्तव्यतया प्राप्तमभिगतेन सह क्षत्रियाणां कर्तव्यमेव ।

प्रथमवक्तव्यं शेष का संक्षिप्त रूप

द्वैतवादियों ने एक पूर्वपक्ष यह भी किया था कि यदि सभी जीवात्मा परमात्मा ही है तो परमात्माओं को मारने के लिये "तस्माद् युद्ध्यस्व भारत" यह आदेश भगवान कैसे देते ? और यह भी पूर्वपक्ष किया था - द्वाविमौ पुरषौ लोके - उत्तमः पुरषस्त्वन्यः यह भेदोपदेश वान्ताशिता होगी । इस के उत्तर में वक्तव्य यही है कि परमात्मा नहीं मारे जाते तो जीवात्मा भी तो नहीं मारे जा सकते । "नायं हन्ति न हन्यते" । युद्धोपदेश तो कर्तव्यनिर्वाहार्थ है । चाहे वह किसी से भी हो प्राप्त होने पर क्षत्रिय के लिये कर्तव्य है" । मैं जीवात्मा

कृतं चार्जुनेनाचार्यपितमहादिभिः पूजार्हैरपि सार्धम् । किं च भवदनुसारेण युद्धकर्तापि परमात्मैवेति - अहं जीवः सन् कथं परमात्मानं हन्यामित्येषा कल्पना भवादृशानामेव भवेत् । आविद्यिकभेदस्य व्यावहारिकस्य सर्वव्यवहारमूलस्य स्वीकारेणैवंविधप्रश्नानुत्थानाच्च । युद्धस्यापि व्यावहारिकान्तःपातित्वात् । भवन्मतेऽपि भगवन्निश्वसितात्मकवेदवचनेन "मा हिंस्यात् सर्वाभूतानी"त्यनेन निषिद्धाया हिंसाया भगवतैव कथं "तस्माद् युध्यस्व भारते"ति निगद्यत इति वक्तव्यम् । किं भगवद्हिंसनमेव पापं नान्यहिंसनमस्तीत्यत्र नियामकं विद्यते ?

हो कर परमात्माओं को कैसे मारूं ऐसी भावना की प्रसक्ति भी स्वमत वासनानुसार ही है । अन्य सब परमात्मा है तो क्या स्वयं परमात्मा नही है ? वस्तुतः औपाधिक भेद को ले कर समस्त व्यवहार का निर्वाह वेदान्त में किया गया है । अतः ऐसा पूर्वपक्ष अद्वैत वेदान्त मत के प्रति उठता ही नहीं है । और आप द्वैतवादी के मत में भी भगवन्निःश्वासरूपी वेद में उक्त "मा हिंस्यात्" के विरुद्ध "तस्माद् युद्ध्यस्व" यह आदेश कैसे बनेगा ? आदेश में यदि प्रश्न नहीं होता है तो समान उत्तर यहाँ भी है ।

यच्चोक्तं "द्वाविमौ पुरुषौ" इत्यादि वान्ताशितामात्रं स्यादित्यादि । तदसत् । द्वाविमाविति लोकप्रसिद्धभेदमनूद्य व्यावहारिकपुरुषद्वयं चानूद्य ततो भिन्नत्वेन पारमार्थिकतत्वस्यो"त्तमः पुरुषस्त्वन्य" इत्यनेन वर्णनात् । अत एव लोके इति विशेषणम् । अन्यथा - त्रयस्तु पुरुषा लोके क्षरश्चाक्षर एव च - उत्तमस्तु तृतीयोऽसौ परमात्मेत्युदाहृत इति पठ्येत । लोके इत्यस्य लौकिकव्यवहारविषयार्थकत्वात् तदन्यत्वं तद्विलक्षणत्वात्मकम् उत्तमपुरुषस्य युक्तमिति यथाश्रुतपाठोपपत्तिः । कार्यात् कारणस्य भिन्नत्वेऽपि कारणात् कार्यस्याभिन्नत्वमेव भवतोऽपि मते ।

"द्वाविमौ" यह लोकसिद्ध भेद का अनुवाद मात्र है । व्यावहारिक दो पुरषों का वर्णन करने के बाद व्यावहारिक से विलक्षण पारमार्थिक पुरष का "उत्तमः पुरषस्त्वन्यः" से कथन है । अत एव "लोके" यह विशेषण है । अन्य शब्द का विलक्षण अर्थ है । यदि ऐसा नहीं होता तो त्रयस्तु पुरुषा लोके तन्मूलक उत्तमस्तु तृतीयः स्यात् इस प्रकार सीधे ही कहते । अतः "लोके" का लौकिकव्यवहार का विषय और "अन्य" का लौकिक से विलक्षण परमार्थिक अर्थ ही उचित है । द्वैत मत में भी कार्य से कारण भिन्न होने पर भी कारण से कार्य अभिन्न होता है ।

मम तु परमात्मन्युत्तमपुरुषे जगतः कल्पितत्वात्तज्ज्ञानेन सर्वज्ञत्वोक्तिः श्रुतौ सङ्गच्छते । तदेवाहात्राप्याह - "यो मामेवमसंमूढो जानाति पुरुषोत्तमं स सर्वविद्" इति । नह्यत्यन्तमन्यस्य पुरुषोत्तमस्य ज्ञानात् सर्ववित्त्वं संभवतीति ।

अद्वैते - श्री स्वामी काशिकानन्दगिरिजी महाराज महामण्डलेश्वराः ।

विशिष्टाद्वैते - श्रीरङ्गप्रिय महादेशिकचरणाः ।

सिद्धान्त में उत्तम पुरूष परमात्मा में जगत कल्पित होने से अधिष्ठान ज्ञान से सर्वज्ञता की उपपत्ति है। इसी से ही "यो मामेवमसंमूढो" - जो मुझे इस प्रकार यथार्थतः पुरषोत्तम जानता है वह "सर्ववित् है" इस उक्ति की संगति है । अन्यथा अन्य पुरुषोत्तम के ज्ञान से अन्य जगत का ज्ञान कैसे होता और सर्वज्ञ कैसे बनते ? "अतः द्वाविमौ " इत्यादि में लोकप्रतीत भेद का अनुवाद कर पारमार्थिक तत्व का ही वर्णन है, वान्ताशिता नहीं है । पूर्वोक्त अद्वैत का समर्थन ही है।

नोट :- विशिष्टाद्वैत की चर्चा अत्यल्प रही उसका यहाँ उल्लेख नहीं किया है ।

अद्वैत पक्ष में श्री स्वामी काशिकानन्द गिरि जी महामण्डलेश्वर रहे ।

विशिष्टाद्वैत में श्रीरङ्गप्रिय महादेशिक रहे ।

द्वैते - श्रीमद् विद्यामान्यतीर्थजी महाराजाः (पालिमार् मठाध्यक्षाः)।
श्रीमद् विश्वेश्वरतीर्थजी महाराजाः (पेजावर् मठध्यक्षाः) ।
अन्ये च सर्वपक्षीया महीयांसो विद्वांसः

सूचना - अतिसंक्षेपेणैव श्रीमत्काशिकानन्दगिरिस्वामिनां प्रवचनविषयोऽत्र संगृहीतः । पण्डितप्रवरैरुक्ता विषयाश्चात्यन्तसंक्षेपेण क्वचित् क्वचिदत्र निर्दिष्टाः पूर्वपक्षोपस्थापनायाम् ।

द्वैत पाक्ष में श्री विद्यामान्य तीर्थ जी - पीलिमार मठाध्यक्ष एवं श्री विश्वेश्वर तीर्थ जी - पेजावर मठाध्यक्ष रहे ।
एवं सभी पक्ष के विशिष्ट - विशिष्ट विद्वान् सभा में उपस्थित थे जो आन्ध्र, तमिल तथा कर्नाटक से आये हुए थे ।

नोट :- इस लेख में श्री स्वामी काशिकानन्द गिरी जी महाराज का शास्त्रार्थ तथा प्रवचन अति संक्षेप में ही दिया गया है तथा अन्य विद्वत्प्रवरों का भी शास्त्रार्थ यहाँ क्वचित् क्वचित् ही दिया गया है:। द्वैत पक्ष प्रदर्शन में अद्वैत मत का पूर्वपक्ष तथा प्रदर्शन प्रायः उन्ही विद्वानों का है । जिस का खण्डन करने में प्रयास द्वैतवादियों ने किया था ।

<u>द्वितीयं</u> <u>परिशिष्टम्</u>

(अद्वैतविजयवैजयन्तीखण्डनाभासोद्धारः)

["वैजयान्त्याक्षेपरूपेण प्रकाशितायाः श्रीमद्भगद्गीतायां क्षेत्रज्ञशब्दार्थविचारः" इति नामिकपुस्तिकायाः पृष्ठपङ्क्तिसंख्याः अधो निर्दिष्टाः ।]

<u>पृष्ठम्</u> <u>१-१:</u> यत्तु तत्त्वमसीत्यत्र तत्पदं पञ्चम्यन्तादिरूपं, तदायतनत्व-तद्भासत्वादिपरं, "सुपां सु" इति विभक्तेः स्वादेशादिति । तन्न । विभक्तौ परतः " त्यदादीतामः" इति, सौ परतः 'तदोः सः सावनन्त्ययोः' इति च प्रसक्तेः सत्वमिति रूपापत्तेः । ततश्च यदि लुगुच्यते तदा लक्षणां विना नोक्तार्थलाभसम्भव इति वक्ष्यामः ।

<u>पृष्ठम्</u> <u>१-४:</u> अद्वितीयमित्यस्य "यथा चोलनृपः सम्राडद्वितीयोऽस्ति भूपतिः" इति विशिष्टाद्वैतिवेङ्कटादिदर्शितस्वकृतश्लोकार्धानुसारेण सदृशद्वितीयाभावपरत्वं यदुक्तं, तन्न, अयमद्वितीयो विद्वानित्यादेः विद्वत्त्वेन सजातीयस्य द्वितीयस्य सत्त्वेऽपि प्रयोगस्य दर्शनात् । सकलोत्कृष्टत्वेन सादृश्यविवक्षा चेत्तादृशद्वितीयाऽप्रसिद्ध्या तन्निषेधो दुर्घटः स्यात् । सर्वश्रेष्ठत्वार्थमात्रेणोपपत्तेः शेषवैयर्थ्याच्च । श्रेष्ठार्थे प्रयोगदर्शनाच्च । श्रेष्ठत्वे च लक्षणैव । किं च शिवं शान्तमद्वैतम्

इत्यत्रोक्ताद्वैतपदसमानार्थत्वाल्लाक्षणिकप्रयोगस्वीकारानौचित्यमेव न हि चोलनृपोऽद्वैत इति क्वचित् प्रयुङ्क्ते । विस्तरस्तु मदीयायामद्वैतपरिशुद्धौ द्रष्टव्यः ।

पृष्ठम् १-१६: क्षेत्रज्ञं चापि मां विद्धीत्यस्य जीवपरैक्य प्रदिपादनोपक्षेपात्मकत्वे ततःपरं - जगदसत्यं, तदुपादानमविद्या, सत्ता त्रिविधेत्यादिकमेव वक्तव्यमासीदिति । तन्न । गीतायाः प्रक्रियाग्रन्थत्वविरहात् । लिङ्गादिभिः शास्त्रतात्पर्यस्य ज्ञेयत्वात् । अन्यथा द्रव्यगुणकर्मसामान्यादिविभक्तिपदार्थनिरूपणाददर्शनात् तदास्पदद्वैतमतपरकत्वं भवतोऽपि स्वप्नायितं स्यात् । मत्तः परतरं नान्यादिति वचनं तृतीयषट्के न विद्यते । तत्र मत्तो नान्यदस्तीति वक्तव्ये परतरं नान्यदित्युक्तिरद्वैतस्यानभिप्रेतत्वं सूचयतीति व्याख्या शब्दत्रोटनमात्रम् । परतरं मा भूत्, परं तु विद्यत एवेति कथं नार्थो भवन्मतेन ? तरबर्थोऽविवक्षित इति चेत्तथापि परं नास्ति समानं त्वस्त्येवेत्यायाति । ततश्च परतरमिति कृत्स्नमेवाऽविवक्षितमिति समाधाने ममापि न दोषः । परतरमित्यत्यन्तभिन्नमन्यन्नास्ति । कल्पितस्याधिष्ठानतोऽत्यन्तभिन्नत्वविरहादिति व्याख्या तदपेक्षया सुगमा, न्याय्या च ।

पृष्ठम् २-४ : असत्यमप्रतिष्ठं ते इति पुनरुत्थाप्य परस्यासुरतासूचनं स्वहृदयस्थितप्रद्वेषज्वालाविस्फोरणमेव । तत्र ब्रूमः ।

सत्यादिपदलक्ष्यार्थ एव ब्रह्म । वाच्यार्थस्त्वाकाशवाय्वादिकं व्यावहारिकं जगदेवेति संक्षेपशारीरिकमदीयाद्वैतपरिशुद्ध्यादौ स्फुटीकृतत्वात्तद्भिन्नमसत्यं प्रातिभासिकमसद्वा भवितुमर्हति इति कथमद्वैतवादनिन्दा ? न वयं जगदसत्यमिति ब्रूमः । किन्तु मिथ्येत्येव । तच्च पारिभाषिकम् । तत्र मिथ्याशब्दोऽनिर्वचनीयतावचन इति पञ्चपादिकावचनात् । निर्वचननिराकरणं खण्डनादौ सम्यक्कृतम् । तदुद्धाराभासो मायाऽद्वैतपरिशुद्धौ निरस्तः ।

पृष्ठम् २-१९ : यच्च यजन्ते नामयज्ञैस्ते इति न माध्यमिकनिन्दा, तैर्यज्ञाऽकरणात् । किन्तु अद्वैतिनिन्दैवेति । तदप्यपेशलम् । यदि खल्वत्र नामयज्ञो-नामजपयज्ञो द्वैतिभिः दम्भेन क्रियमाण इति कश्चिद्व्याचक्षीत तदा किंमुत्तरं भवतः ? बुद्धमतस्य श्रीकृष्णोत्तरकालीनस्य श्रीकृष्णेन निन्दनमप्रसक्तमेव । माध्यमिकत्वोक्तिस्तत्सादृश्यमात्रेणाचार्याणाम् । बुद्धात् पूर्वमपि नास्तिका आसन् दम्भाद्यज्ञादिकमपि कुर्वाणाः । बुद्धोऽपि पित्रा सम्पाद्यमाने यज्ञे समुपविशन्नेव पशुविशसनमालोक्य विरक्तोऽभूदितीतिहासविदां प्रवादः ।

पृष्ठम् ३-१ : जगत् सदसद्विलक्षणमेवोपेयते । यत्तु सद्विलक्षणत्वमात्रं लाघवाद्युक्तमिति । अस्त्वनुमाने तावन्मात्रप्रवेशो लाघवात् । किन्तु लाघवाद्वन्हिरेव साध्यो नु तु प्रमेयवन्हिरित्येतावता वन्हेरप्रमेयत्वं मूढा

एव ब्रूयुः । एतैः सह शास्त्रचर्चाप्युपहास एव । एकजीववादस्य दृष्टिसृष्टिवादस्य च रहस्यमसाम्प्रदायिकैर्ज्ञातुमशक्यमिति नाऽन्धरूपकथान्याये प्रविविक्षामः । आकरग्रन्थास्तदर्थमवगाहनीयाः ।

<u>पृष्ठम्</u> <u>३-१८</u> : ईश्वरोऽहमित्यादिरद्वैतनिन्देति साहसम् । महावाक्येषु भागत्यागलक्षणायाःस्वीकारात् । असुरा ईश्वरोऽहमिति न भागत्यागेन ब्रुवते । किन्तु दम्भदर्पाभिमानादियुक्ता भूमिधनादीश्वरं परमसमर्थं वा स्वं मन्वाना इति च्छलवचनमिदं भवदीयम् ।

<u>पृष्ठम्</u> <u>४-६</u> : ईश्वरः सर्वभूतानामित्यादिर्न गीतोपसंहारः । किन्तु सर्वधर्मान् परित्यज्येत्यादिरेव । तद्व्याख्या शाङ्करभाष्यादौ द्रष्टव्या, मदीयप्रवचने ध्वनियन्त्रे (on Tape-recorder) च श्रोतव्या ।

<u>पृष्ठम्</u> <u>४-११</u> : पूर्वापरपरामर्शो - मद्भावायोपपद्यते, विभक्तमिव, परमात्मेति चाप्युक्तः, ब्रह्म सम्पद्यते, ब्रह्मभूयाय कल्पते, सर्वस्य चाहं हृदि, मामात्मपरदेहेषु प्रद्विषन्तः, मां चैवान्तःशरीरस्थं, मामेकं शरणम् इत्युत्तरत्र । वासुदेवः सर्वमित्यादि पूर्वत्र । यो लोकत्रयमाविश्येत्यनेन गतार्थत्वात् सर्वस्य चाहं हृदीत्यादि जीवात्मना स्थितिरेवोक्ता ।

<u>पृष्ठम्</u> <u>४-१४</u> : कोशे देवदत्तोऽहं जातो मरिष्यामीत्यादि

लोकप्रतीतिसिद्धेनात्मशरीराध्यासेन व्यवह्रियमाणो जीवः प्राणीत्वित्यादिना प्रतिपादितः । शरीरान्निकृष्य ज्ञायमानश्च क्षेत्रज्ञ आत्मेत्यादिना दर्शितः । तत्र क्रमः - क्षेत्रज्ञ इत्यादिर्नित्यात्मपर्यायोक्तिः । ततो जनुर्जननेत्यादिजन्मपर्यायोक्तिः । ततः प्राणीत्वित्यादिना जन्मविशिष्टात्मपर्यायोक्तिरिति । अथ यथा किञ्चिद्धर्मान्तरपुरस्कारेण क्षेत्रज्ञादितः पृथग् भवन्मते प्राण्यादयः पठितास्तथा नारायणादितः धर्मान्तरान्तर्यामित्वादि पुरस्कारेण क्षेत्रज्ञादय ईश्वरपर्यायाः पृथक् पठ्यन्तां, तत्रं कथं मन्मते दोष इति चेत् ? पठ्यन्तां पृथक् । किन्तु नारायणपर्यायसमीपे एव स्वर्गवर्गे एव किमिति न पठिताः ? कुतो दूरे बुद्धिवर्गे पठिताः ? न हि बुद्धिमात्रान्तर्यामी सः । येन साङ्गत्यं स्यात् । स हि पृथिव्यादिसकलजगदन्तर्याम्येव । तस्मादन्तर्यामिणि क्वाचित्कप्रयोगो भाक्त एव । एवमात्मशब्दोऽपि । अन्यथा आत्मा वा अरे द्रष्टव्यः श्रोतव्य इति विधिवाक्ये परमात्मन्यात्मशब्दस्य मुख्यताया भवता स्वीकारान्मुख्यार्थे गौणार्थस्याऽप्रसक्तत्वाद्,न विधौ परः शब्दार्थ इति न्यायाच्च जीवात्मनोऽप्रसक्तत्वात् संशयविरहेण वाक्यान्वयाधिकरणमेव नावकल्पेत । याज्ञवाल्कस्य द्वे भार्ये इत्यर्थवादप्रकरणपाठितस्य "न वा अरे पत्युः कामये"त्यादि वाक्यस्य श्रोतव्यादिविधिवाक्यघटकात्मपदार्थान्यथाकरणे सामार्थ्यविरहात् । संशयस्थले एवार्थवादस्य निर्णायकत्वात् ।

पृष्ठम् ६-१ : गौणश्चेन्नात्मशब्दादित्यत्र जडप्रकृतिवारणमात्मशब्देन कृतम् । अयमात्मशब्दः परमात्मपरिग्रहे एव सम्यगवकल्पत इत्यादि भाष्यं तु परमात्ममुख्यार्थपक्षे व्यर्थमेव स्यात् । ततश्च मुख्यार्थजीवत्वप्रसक्तिवारणाय तथोक्तिरिति युक्तम् ।

पृष्ठम् ६-५ : प्रकृतिपुरुषयोः सांख्यमात्रप्रसिद्धत्वं नास्माभिरुक्तमिति तदभावोक्तिरनुक्तोपालम्भमात्रम् । अस्मद्वचने मात्रपदविरहात् । ततश्च अन्यत्र तत्प्रयोगप्रदर्शनं वृथैव । परमात्मा पुरुषः पर इत्यादौ परमत्वादिविशेषणमात्मादिशब्दानांपरमात्मरूढत्वे व्यर्थं स्यात् । न च जीवात्माप्यर्थोऽस्तीति तद्वारणाय परमत्वादिविशेषणमिति वाच्यम् । जीवात्मनि चेतनत्वेन सदृशे लक्षणयैवोपपत्तौ नानार्थकल्पनावैयर्थ्यात् । किं चैवं व्योमाकाशादिशब्दानामपि परमात्मार्थकत्वं स्यात्। "परमे व्योमन्" "आकाशाद्ध्येव खल्विमानि भूतानि जायन्त" इत्यादिश्रुतौ परमात्मार्थसत्त्वात् । न चैतदङ्गीक्रियते । अत एव् आकाशादिपदानां परमात्मनि शक्तिरेवेति पूर्वाचार्यमतमाचार्यचस्पतिमिश्रैर्निरस्तम् आत्मादिशब्दानांपरमात्माऽर्थ इति भवदुक्तिश्च लोके यः शब्दो यमर्थं बोधयति स तमेव वेदेऽपीति स्वोदाहृदवचनाविरुद्धा च । लोके हि ममात्मा दुःखीत्यादि प्रयुज्यते । नास्तिका अपि आत्मशब्दं प्रयुञ्जते । लोकास्तु परमात्मशब्दमेवेश्वरार्थे ब्रुवन्ति । न हि विष्णुः परमात्मा

मधुवनमागत इत्यर्थे आत्मा मधुवनमागत इति कोऽपि ब्रूते ।

पृष्ठम् ६-२१ : क्षेत्रज्ञत्वं न शुद्धस्य भवन्मते द्रष्टृत्वस्य जडविशिष्टाहमर्थधर्मत्वादित्यादिकं वचनं भवतः सिद्धान्तानभिज्ञतानिबन्धनम् । प्रकाशरूप एव प्रकाशकत्वेन व्यवह्रियते । न हि सूर्यप्रकाशो घटं प्रकाशयतीत्युक्ते स्वातिरिक्तप्रकाशकर्तृत्वं सूर्यप्रकाशे प्रतीयेतेत्यन्यत्र विस्तरः ।

पृष्ठम् ७-१ : ननु भगवता यौगिकार्थः प्रदर्श्यते । कुतो भवता बलाद्रूढ्यर्थो गृह्यते क्षेत्रज्ञपदस्येति चेत् । एवं सति जीवोऽपि क्षेत्रं जानातीति जीवार्थकत्वं भवता कथं वार्यताम् । न च महाभूतादिसर्वक्षेत्रज्ञानं न जीवस्येति वाच्यम् । योगिनां सत्त्वात् । सर्वत्वविशेषणानुक्तेश्च । किं च "क्षेत्रक्षेत्रज्ञयोर्ज्ञानं यत्तज्ज्ञानं मतं मम "त्युच्यमानं क्षेत्रज्ञानं कस्मिंश्चिज्जीवे भवति न वा । यदि न भवति तदा व्यर्था तदुक्तिः । परमात्मनि यत्तादृशं ज्ञानं तज्ज्ञानं ममेति कथनवैयर्थ्यात् । अथ कस्मिंश्चिज्जीवे विद्यते तदा स क्षेत्रज्ञो जीवः "क्षेत्रज्ञं चापि मां विद्धी"ति वचनविषयः कथं न भवति ?

पृष्ठम् ७-१२ : योगार्थसम्भवे रूढ्यर्थ इति विपरीतम् । योगाद्रूढिर्बलीयसीत्येवप्रसिद्धत्वात् । योगस्यातिप्रसक्तौ रूढ्यङ्गीकार इत्यप्ययुक्तम् । कुत्रातिप्रसक्तिः ? अरूढार्थे चेत् सिद्धं

रूढार्थमुख्यत्वम् । योगार्थतावच्छेदकविशिष्टस्य न परेणैक्यमिति तु सम्यगाह भवान् । अत एव भागत्यागं वयं ब्रूमः ।

पृष्ठम् ८-१ : विष्णोर्नामसहस्रं मे श्रुणु इति न नाम्नां विष्णुशक्तत्वनिश्चायकम् । न हि तन्नामत्वमेव तच्छक्तत्वम् । यानि नामानि गौणानीति वदतोव्याघातापत्तेः । यत्तु "किन्तु जपार्थतया नामानि पठ्यन्ते" इत्यस्मदीये वाक्ये केवलपदं योजयित्वा अर्थनिरपेक्षतामापाद्य भवता दोषापादनं तद् विदुषां न शोभास्पदम् । तज्जपस्तदर्थभावनमिति पातञ्जलवचनाज्जपस्य अर्थस्मरणाऽविरोधित्वात् । गौणार्थत्वं गुणमात्रप्रतिपादकत्वम् । केचन गौणीं वृत्तिमतिरिक्तामभ्युपगच्छन्ति । मुख्यार्थत्वं शक्तत्वम् । यद्यपि पद्मनाभादिपदानां विष्णौ शक्तत्वमप्यस्ति तथापि तानि वक्ष्याम्यशेषत इत्यत्राशेषपदेन सहस्रत्वमभिप्रेतं तदा पद्मनाभादिनामभिरपि तदर्थगुणमात्रग्रहणं स्यात् । विष्णुनामत्वेनोक्ततयाविष्णुत्वस्य सर्वत्रानुवर्त्तमानतयैव सिद्धेः । अत एव सर्वेषां नाम्नां व्युत्पत्तिर्भाष्ये प्रदर्शिता । न च गुणमात्रप्रतिपादकत्वे विष्णुनामत्वं न स्यादिति वाच्यम् । तादृशगुणवत्त्वेन विष्णुनामत्वाक्षतेः । न हि द्रव्याणीत्युक्ते घटोऽनुक्तः स्यात् । पृथिव्यादीनां सर्वेषां द्रव्यनामत्वात् । न च विष्णुत्वावच्छिन्नबोधकत्वमेव तन्नामत्वमिति वाच्यम् ।

पृथिवीत्वाद्यवच्छिन्नबोधकत्वविरहेण नवानामपि पृथिव्यादीनां द्रव्यमिति नाम न चेत्कस्य नाम द्रव्यमिति स्यात् ? भवत्प्रदर्शितवाचस्पत्यादिकोशेषु नामसहस्रस्य विष्णुत्वावच्छिन्नार्थ-प्रदर्शनाऽदर्शनात् । अन्येषु कोशेषु नितराम् । "सर्वः शर्वः शिवः स्थाणुरि"ति तत्र पाठसत्त्वात् शिवादिपदानां विष्णुत्वावच्छिन्नशक्तत्वात्' नमः शिवाय च शिवतराय चे"ति वेदोक्तनमःशिवायमन्त्रमेव कुतो न भवन्तो वैष्णवा जपन्ति ? शङ्करार्थकत्वमप्यस्तीति चेद्दानराद्यर्थकत्वमप्यस्तीति हर्यादिमन्त्रानपि न जपेयुः । वस्तुस्तु व्याकरणकोशादयः शब्दसाधुत्वतदर्थप्रत्यायनादिमुख्यप्रयोजनतया प्रवृत्ता इति ततः शक्तिनिर्णयो भवति । विष्णुसहस्रनाम तु यशः प्राप्नोति विपुलं ज्ञातिप्राधान्यमेव च वेदान्तगो ब्राह्मणः स्यादित्यादिफलप्रयोजकपुण्यमुख्यप्रयोजकतया प्रवृत्तमिति शक्तिग्रहार्थत्वविरहात्तेन शक्तिनिर्णायनमयुक्तमेव । शक्तिं विनापि तत्तन्नामतः पुण्यसम्भवात् ।

<u>पृष्ठम्</u> <u>९-७</u> : गुणप्रतिपादकत्वं तूपगच्छामः । तत एव नाम्नां गौणत्वोपपत्तेः । विष्णुत्वावाच्छिन्नमुख्यार्थतायांन तात्पर्यमस्तीति तु ब्रूमः । तत्तद्गुणवत्त्वेन तु विष्णुनामप्रथमोत्पन्नविष्णुत्वज्ञानोपनयेनच सर्वत्र विष्णुत्वभानसम्भवाल्लक्षणयापि विष्णुत्वोपस्थापनं व्यर्थमेव ।

विश्वस्मै नम इत्यादि सोऽहवाक्ये त्वर्थाध्याहारपक्षे न कापि क्षतिः । विष्णुत्वावच्छिन्नशक्तत्वे सर्वो नाम कश्चित्तस्मै सर्वाय नम इतिवद् विश्वाय नम इति वक्तव्यं स्यात् । यदि च विष्णुत्वाविशिष्टस्मरणमावश्यकम्, अर्थाध्याहारश्च नोपेयते तदापि विश्वस्मै नम इत्यादिशाब्दबोधद्वितीयक्षणे विष्णुत्वोपनीतभानस्य सुकरत्वान्न कापि हानिः । अर्थानुसन्धानं ह्यपेक्षितं न त्वर्थशाब्दबोधनियमः । लक्षणापक्षशब्दाध्याहारपक्षौ च शक्यावेवाश्रयितुम् । मुक्तानां परमा गतिरित्यादावसमस्तपदत्रयाद्यात्मकनामसु न शक्तिर्नापि लक्षणा । तत्र विष्णुत्वोपस्थितिर्दर्शितोपायान्तरेणैव । गङ्गादिपदानां तीरादौ बहुलं प्रयोगसत्त्वेऽपि न तीरत्वावच्छिन्ने शक्तिः । एवं क्वचिदन्तर्यामिणि क्षेत्रज्ञादिपदानां प्रयोगेऽपि लाघवाज्जीवात्मनि शक्तिः । अन्तर्यामिणि तदभिन्नत्वतन्नियामकत्वादिसम्बन्धमादाय लक्षणयैवोपपत्तेः । अन्यायश्चानेकार्थत्वमिति न्यायात् । प्रमाणतया भवदुपन्यस्तवाचस्पत्यकोशे जीवार्थकत्वमपि क्षेत्रज्ञपदस्य दर्शितमस्तीति तत् कथं नाद्राक्षीद् भवानिति चित्रम् । अमरप्रामाण्येन जीवार्थकत्वं दर्शितमिति कथममरे परमात्मपरत्वं क्षेत्रज्ञादिपदानां भवता निरणायीत्यपि चित्रम् । स्वाभिप्रेतांशे वाचस्पत्यादिः प्रमाणमन्यांशे विनैव कारणमप्रमाणमित्यर्धजरतीयता कथम् ?

तेजोऽबन्नानां "हन्ताहमिमास्तिस्रो देवता" इति श्रुतेर्देवतात्वं वयं ब्रूमः । सोमलताया देवतात्वं न कुत्राप्युक्तमुपलभ्यते । परं श्रुत्युक्तमपि तेजोऽबन्नानां देवतात्वममुख्यमेव मन्यामहे । भवांस्तु श्रुत्यनुक्तमपि प्रामाणिककोशाऽप्रदर्शितमपि क्षेत्रज्ञशब्दस्यान्तर्यामित्वार्थकत्वं क्वाचित्कप्रयोगेणोट्टङ्कयति । जीवात्मत्वस्य न्यायमते जातित्वादखण्डत्वाद् अन्तर्यामित्वस्य च परमात्मगतधर्मविशेषस्यान्तःस्थित्वा नियामकत्वादिलक्षणस्य सखण्डस्य गुरुत्वाद् लाघवेन जीवात्मत्वावच्छिन्ने शक्तिरन्तर्यामिणि लक्षणेत्येव युक्तम् । एवं न्यायेन मीमांसया च सर्वत्रार्थनिर्णये क्रियमाणे याज्ञिकप्रक्रियाविप्लवापादनमतिसाहसमात्रम् । अन्यायश्चानेकार्थत्वमिति न्यायाद्रुद्रादिपदानां शङ्करे एव शक्तिर्न तु विष्णावपि । सर्वत्र व्यवहारकोशादौ तदर्थप्रसिद्धेः । विष्णुसहस्रनामनि रुद्रशब्दान्तर्भावो गौण्या वृत्त्या सम्भवति । वत्सापाकरणदोहनादिबहुविधिसमनन्तभाविनः पयोहोमविधेः उपस्थितदुग्धविषयकत्वं परित्यज्य जलविषयकत्वं न कोऽपि कल्पयिष्यति इति तदापादनमपि वृथैव । अत्र च गौणत्वोक्तिसत्त्वादुक्तयुक्तिभिश्च क्षेत्रज्ञादिपदानां नान्तर्यामिणि शक्तिरिति ब्रूमः ।

<u>पृष्ठम्</u> <u>९-९</u> : इदं शब्दस्य न प्रमाणसिद्धसर्ववस्त्वर्थकत्वं

भवद्दर्शितमङ्गीकुर्मः ।

"इदमस्तु संनिकृष्टं समीपतरवर्ति चैतदो रूपम् ।

अदसस्तु विप्रकृष्टे तदिति परोक्षे विजानीयात् ।।

इत्यभियुक्तवचनात्तथैव लोके प्रयोगदर्शनाच्च तदितरार्थे लक्षणयैव प्रयोगः । न चेदं शरीरमित्यत्र लाक्षणिकार्थकत्वम् । हेतोरभावात् । सर्वदृश्यार्थत्वे वा शरीरपदवैयर्थ्यमवोचाम । न च भवन्मते इदंपद वैयर्थ्यमिति वाच्यम् । उदाहरणरूपेण प्रत्यक्षनिर्देशनार्थत्वात् । अत एवोत्तरश्लोके सामान्यविवक्षया सर्वक्षेत्रेष्वित्युक्तम् ।

पृष्ठम् १०-२ : जीवं मां विद्धीत्युक्त्या गतार्थतेत्ययुक्तम् । लाघवविरहात् छन्दोभङ्गापत्तेश्च । तथोक्तौ प्रथमश्लोकानुपयोग एवेति लाघवमिति चेन्न । शरीरादिविशिष्टस्य जीवशब्देनोपस्थितेस्तस्य परमात्मत्वविधानायोगात्। अन्योन्याध्यासेन शरीरातिरिक्तस्यात्मनो लोकानां प्रत्ययविरहेण शरीरादेः पृथगात्मप्रदर्शनार्थत्वेन तत्सार्थक्यस्य पूर्वमुक्तत्वात् । प्रत्युत भवन्मते वैकुण्ठातिरिक्तस्थलेष्वपि नारायणो वर्तते चेत् - "सर्वज्ञं खलु मां विद्धि सर्ववस्तुषु भारत" इत्येव पठ्येत । तत्रैव तात्पर्यस्य भवता स्वीकृतत्वात् । किमर्थो द्रविडप्राणायामः प्रथमं क्षेत्रज्ञमुक्त्वा शरीरं क्षेत्रमिति भ्रममुत्पाद्य महाभूतादीनि सर्वाणि क्षेत्रमिति निर्ब्रुवता भगवता कृतः । तत्रापि जीवात्मनोऽपरिगणनात्तज्ज्ञत्वंन लब्धमिति भक्षितेपि

लशुन इति न्यायविषयतापातः । यो यच्छरीरः स तज्ज्ञ इति भवद्दर्शितव्याप्तिश्च सुषुप्तिमूर्च्छादौ व्यभिचारिता । नैयायिकैरवयवोपचयापचयाभ्यां शरीरादिभेदस्वीकाराद् मूर्छितस्य शल्यक्रियायां शरीरभेदसत्त्वात् । पञ्चाग्निविद्योदितव्रीहियवादिशरीरे नित्यमूर्च्छितत्वाज्ञान्यथा कर्मिणां कण्डनकुट्टनादि-जनितमहाक्लेशापत्तेर्दर्शितत्वात् । एतेन प्रतियोगि-वैयधिकरण्यावच्छिन्नसाध्याभावाधिकरणवृत्तित्वं व्यभिचार इत्युक्तावप्यनिस्तार एव ।

<u>पृष्ठम</u> <u>१०-१२</u> : तदुत्थाप्याकाङ्क्षानिवर्त्तकत्वेनैकवाक्यत्वाद् वाक्यभेददोषाभावं मन्वानोऽनधिगतमीमांसादिशास्त्रसिद्धान्तएव । देवदत्तो गच्छति, यज्ञदत्तो निधनं गतः इत्यादावपि देवदत्तगमनात्पूर्वं किंवृत्तम् ? यज्ञदत्तनिधनोत्तरं किं भवतीत्युत्थाप्याकाङ्क्षासम्भवेन तन्निवर्त्तकत्वसत्त्वादेकवाक्यत्वापत्तेः। एका उत्थाप्याऽऽकाङ्क्षा, अपरा उत्थिताकाङ्क्षेति विभागमपि नैष लेखको जानातीति अनेन कीदृशी शास्त्रचर्चा स्यात् । अस्तु तदुत्थिताकाङ्क्षानिवर्त्तकत्वतात्पर्यम् । तथाप्येवंविधैकवाक्यत्वं न वाक्यभेददोषहरणम् । "सोमेन यजेते" त्यत्र सोमद्रव्येण यागं भावयेदित्युक्ते प्रयोजनमनुद्दिश्य न मन्दोपि. प्रवर्तत इति न्यायात् किमर्थं यागं भावयेदित्याकाङ्क्षोत्थानावश्यम्भावाद् यागेन स्वर्गं भावयेदित्यस्य च तन्निवर्तकत्वादेकवाक्यतासत्त्वेन

मत्वर्थलक्षणास्वीकारो मीमांसकानां व्यर्थः स्यात् ।

पृष्ठम् १०-१५ एतद्यो वेत्तीत्युक्ते क्षेत्राद्विलक्षणः क्षेत्रज्ञ उक्तः । तत्र क्षेत्रात् शरीरादेव पृथक् किं वा तत्कारणादेरपि. किं च कीदृगिदं क्षेत्रं यतोऽत्यन्तपार्थक्यं क्षेत्रज्ञस्येत्यादि जिज्ञासायां तत्क्षेत्रं यच्चेत्यादिग्रन्थ उत्थितः । तदनन्तरं ज्ञानसाधनोक्तिरिति कथमुत्तरासङ्गतिः? भवन्मते सर्वज्ञत्वं कुतः साधनीयमिह विना प्रसङ्गम् । "वेदाहं समतीतानि वर्त्तमानानि" "अहं सर्वस्य प्रभवः" (उपादानादिगोचरापरोक्षज्ञानादिमत्वं हि कर्त्तृत्वम्) "विष्टभ्याहमिदं कृत्स्नम्" इत्यादिना यदि सर्वज्ञत्वं नावगतं तदा महाभूताहङ्कारादिपरिगणनमात्रेण कथं सर्वज्ञत्वावगमः स्यात् । संशयोच्छेदाय सर्वज्ञ इति शब्दमेव कुतो न प्रायुङ्क्त । क्षेत्रान्तर्गतत्वे यच्च यादृक् च यद्विकारीत्यादि प्रतिज्ञानं कुतः ? एतत्क्षेत्रं समासेन सविकारामित्यत्र सविकारपदं किमर्थम् ? यदि क्षेत्रान्तर्गतो विकारः । जीवात्मनोऽनुक्तत्वात् कथं सर्वज्ञत्वसिद्धिः ? चेतनेति तदीयज्ञानस्यैवोक्तत्वात् । समासेनोक्तत्वाद् व्यासं जानाति न वेत्यनिर्णयात् कथं सर्वज्ञत्वसिद्धिः? प्रकारान्तरेण चेत् सर्वज्ञत्वमपि तथेति व्यर्था परिगणना ।

पृष्ठम् ११-३ : तत्त्वमसीत्यादौ विशिष्टोपस्थितिकाले एव विशेषणयोर्विरोधज्ञानमपिभवति । न हि घटवद्भूतलं घटाभाववदित्युक्ते

विरोधज्ञानाभावेन शाब्दबोधः प्रथममुत्पद्यत इति केनापि स्वीक्रियते । विशिष्टशुद्धयोरनिर्वचनीयभेदमात्रस्वीकारात् शुद्धोपस्थितिरपि भवत्येवेति द्वितीयक्षणे विशेषणत्यागपूर्वकशाब्दबोधो भवेदेव । भवन्मते विशिष्टशुद्धयोर्भेदसत्वाद् नीलघटवानिति बुद्ध्युत्तरं घटो नास्तीति ज्ञानं प्रसज्यत इति विशिष्टबोधकाले शुद्धबोधोऽपि स्वातन्त्र्येण भवतीति गलेपादुकान्यायेन स्वीकर्त्तव्यम् । तदभाववत्ताज्ञानं प्रति तद्वत्तानिश्चयस्यैव प्रतिबन्धकत्वात् । तत्कालविशिष्टैतत्कालविशिष्टयोरभेदशब्दबोधो विशिष्टशुद्धाऽभेदवादिमतेऽपि न भवति अयं वृद्धो बाल इत्यादिना बोधादर्शनादिति सोऽयमित्यत्र विशिष्टाभेदबोधस्वीकारो मूढानामेव स्यात् । योग्यताज्ञानतात्पर्यज्ञानयोरपि शाब्दबोधे कारणत्वात्तत्काले एवं विरोधविशेषणपरित्यजनीयतयोरुपस्थितत्वाद् बहुविलम्बेन बोधोत्पत्तिकथनं सक्तुधान्यवाहिनोः कथामेवानुकरोति । अयमश्वो गौरित्यादौ योग्यतादिविरहान्न शब्दबोधः केनाप्युपगम्यते । भवन्मते विरोधाद्युपस्थितेः प्रागेव पदार्थोपस्थितिमात्रतः शाब्दबोधः स्यात् । यदि च गोत्वमश्वत्वं च विरुध्दमिति पूर्वमेवावगतं तर्हि तत्कालैतत्कालौ विरुद्धौ सर्वज्ञत्वाल्पज्ञत्वे विरुद्धे इत्यादिकमपि तथैवेति यत्किञ्चिदेवेदम् । एवमेव राजपुरुषः राजभृत्य इत्यादावपि राजसम्बन्ध्यभिन्नः पुरुषादिरिति बोधे भवद्दर्शितविकल्पानां सम्भावितत्वेऽपि तानकृत्वैव सर्वेषां बोधोदयोऽनुभवसिद्धः । पदद्वये

पदद्वये लक्षणा चेदेव निरूढलक्षणेत्यनुक्तोपालम्भः । राजपुरुष इत्यादावेकपदे निरूढलक्षणोपगमात् । अनाद्यविप्रतिपन्नप्रयोगसिद्धत्वमित्यलक्षणं निरूढस्य । पञ्चमीसमासषष्ठीसमासादिष्वर्थभेदसत्त्वेन कस्मिन्नर्थे प्रयोग इति विप्रतिपत्तिसत्त्वात् ।

पृष्ठम् १२-६ : तत्त्वमसीत्यत्र "सुपां सु" इति स्वादेश इति मौढ्यमात्रम् । "त्यदादीनामः" "तदोः सः सावनन्त्ययोरि"ति सूत्रयोः प्रवृत्त्यापत्तेः । अतो लुगेव वक्तव्यः । तत्र विभक्तिस्मरणविरहाल्लक्षणा दुर्वारा, लुकि तत्पदोत्तरतत्पदलक्षणाकाङ्क्षाविरहात् तत्सत्त्वे वा यथोक्तसूत्रद्वयप्रवृत्तिर्दुर्वारैव ।

अखण्डाकारवृत्तिविषये आकरग्रन्थेषु विस्तरो द्रष्टव्यः ।

दर्शयतीत्यस्य शाब्दबोधानुकूलव्यापारवत्त्वार्थकत्वमलोकवेदसिद्धम् । पश्यार्थैश्चानालोचन इत्यालोचनार्थमात्रं सूचितम् । परं सोऽर्थश्च लक्षणयैव । सम्भवति च शक्यार्थग्रहणे लक्षणाश्रयणमयुक्तम् । दशमस्त्वमसीत्यादौ शब्दात्प्रत्यक्षस्याकरेष्वद्वैतपरिशुद्धौ च स्थापितत्वात् सनत्कुमारो दर्शयतीत्यत्र प्रत्यक्षार्थकत्वमेव धातोः । शाब्दबोधसमानाकार एव शब्दात् साक्षात्कार इत्यप्ययुक्तम्। बहुषु पशुषु स्थितेषु को गज इति जिज्ञासोः केनापि गजमङ्गुल्या निर्दिश्यायं

गज इत्युक्तस्य गजत्वप्रकारकसाक्षात्कार एव भवति, न तु शब्दानुसारेण एतदभिन्नो गज इति । विस्तरोऽद्वैतपरिशुद्ध्यादौ ।

व क्त व्य शे षे

परमात्मनो भिन्नत्वे रूपं देहि जयं देहि मोक्षं देहीत्याद्याभिलाषयैव तत्प्रेम स्यात् । अन्यथा प्रस्तर-काष्ठादिकमेव कुतो न भजेयुः । तदा परमप्रेम रूपजयंमोक्षादिष्वेव । सा त्वस्मिन् परमप्रेमरूपेति नारदीयं सूत्रम् । तद् भिन्ने परमात्मनि नैव घटेत । तवाधिपत्रमेव न ममाधिपत्रं, व्यावहारिकभेदोपगमात् । यस्मिन् विज्ञाते सर्वमिदं विज्ञातमिति श्रुत्यर्थ एव सर्वविदिति गीतावाक्येनोक्तः । शेषं गतार्थम् ।

अस्याः पुस्तिकायाः मुद्रणं राष्ट्रीय-सॉफ्टवेयर-प्रौद्योगिकी-केन्द्रम्
(गुल्मोहर-क्रास-मार्ग सं. ९, जुहू, बम्बई - ४०००४९)
इति संस्थया प्रदत्तायाः 'विविधा' प्रक्रियासामग्र्याः सहाय्येन कृतम् ।
तस्याम् उपयोगितानाम् अक्षरमातृकारूपाणां विकसनेन तेषाम् अस्मभ्यम् उपपादनेन च राष्ट्रीय-सॉफ्टवेयर-प्रौद्योगिकी-केन्द्रम् इति संस्थायाः डॉ. एस. पी. मुदुर-महाभागेन सुरेशः के-महाभागेन च उपकृताः वयम् इति अगाधां कृतज्ञतां प्रबलं गुणग्राहकत्वं च प्रकटयामः।

डॉ. अ. सदानन्दन्,
उपाध्यक्षः, भारती-संस्कृत-विद्या-निकेतनम्

This Book has been published with the help of the Computer Software 'VIVIDHA' supplied by National Centre for Software Technology, Gulmohar Cross Road No.9, Juhu, Bombay 400049.

Our indebtedness and high appreciation are due to Dr. S.P. Mudur and Shri Suresh K. of NCST (National Centre for Software Technology) who helped us by developing & supplying different types of fonts used in this publication.

Dr. A. Sadanandan, Vice-President, B.S.V.N.

प्रथमावृत्तिः २००० प्रतयः, ऑगस्ट १९९१.
First Edition 2000 copies, August 1991.

मूल्यम् :- रू. १०/-
Price :- Rs.10 /-

Associated Advertiser & Printer, Bombay 400 034.